# 26

# संस्कृतस्य प्रयोजनमूलकता

भवन्तः जानन्ति एव किमपि वस्तु, कापि क्रिया, कोऽपि व्यवहारः सर्वमेव प्रयोजनमूलकम् एव भवति। प्रयोजनं विना तु मन्दः अपि न प्रवर्तते। एकस्य वस्तुनः, क्रियायाः वा प्रयोजनम् एकम् अनेकं वा भवितुं शक्नोति। यदा भवान् जलपूरितं किमपि पात्रं नीत्वा विद्यालयं भ्रमणाय वा गच्छति, तदा जलस्य उपयोगः तु पिपासा–शान्त्यर्थम्/ मुखधावनार्थम्, वस्त्रपतित–दोष–धावनार्थम्, फलप्रक्षालनार्थम् दुर्घटनाग्रस्तस्य मूर्च्छितजनस्य नेत्रयोः सि×चनार्थम्, वा भवितुं शक्यते। एवं हि परिस्थितिवशात् जलस्य विविधप्रयोजनानि वयं पश्यामः। एवमेव भाषायाः अपि क्षेत्रवशात् विविधानि प्रयोजनानि भवन्ति। पाठेऽस्मिन् वयं प्रयोजनमूलकं संस्कृतस्य विषये पठामः।

## उद्देश्यानि

**इमं पाठं पठित्वा भवान्–**

- प्रयोजनमूलकसंस्कृतस्य अभिप्रायं व्यक्तुं शक्तः भविष्यति;
- संस्कृतभाषायाः विविधरूपाणाम् उल्लेखं करिष्यति;
- प्रयोजनमूलकसंस्कृतस्य विविधक्षेत्राणां परिचयं दास्यति;
- प्रयोजनमूलकसंस्कृतस्य उपयोगिताम् आधृत्य स्वविचारान् प्रस्तोष्यति।

## क्रियाकलापः

भवान् शैक्षिकभ्रमणाय 'आगरा' इति नगरं गन्तुम् निश्चयम् करोति। निश्चितमेव अस्याः

शैक्षिकयात्रायाः अनेकानि प्रयोजनानि भवतः मनसि भविष्यन्ति। कानिचित् त्रीणि प्रयोजनानि महत्त्वक्रमेण अत्र लिखतु–

1. ..........................................

2. ..........................................

3. ..........................................

## 26.0 अधुना अवगच्छामः

## संस्कृतस्य प्रयोजनमूलकता

## 26.1 परिचयः

भाषायाः महत्त्वं तु सृष्टिकालतः एव वर्तते। भाषां विना जीवनं सक्रियतां न भजते। सांसारिक–व्यवहारः अपि सम्यक् न प्रचलति। भाषा अस्माकं कृते न केवलं परस्परं विचाराणाम् आदान–प्रदानस्य साधनम् अस्ति, अपितु तद्भाषायां रचितं विविधं साहित्यं पठित्वा वयम् तन्निहितं जीवनमूल्यानि धारयामः। एवमेव विविधं ज्ञानं विज्ञानं च जानीमः। प्राकृतिकसम्पदः ज्ञानम्, कृषिक्षेत्रे अन्नानाम्, प्रयुक्तोपकरणानां नामानि, विपणिस्थवस्तूनां नामानि शिष्ट–व्यवहारोचित–शब्दानां ज्ञानमपि तद्भाषया एव बोधामः।

संस्कृतं तु विश्वस्य प्राचीनतमा भाषा। अस्याः भाषायाः विपुलं साहित्यम्, विशालः शब्दभण्डारः, ज्ञानकोषः च। ऋक्–यजुः–साम–अथर्ववेदाः विश्वस्य प्राचीनतमाः ग्रन्थाः। वेदस्य षडङ्गानि शिक्षा–कल्प–निरुक्त–व्याकरण–छन्दः–ज्योतींषि। व्याख्याग्रन्थाः ब्राह्मण–आरण्यकादयः, वेदान्तग्रन्थाः उपनिषदादयः। सर्वम् एतत्तु वैदिकं साहित्यम्। अष्टादशपुराणानि, रामायणम्, महाभारतम्, नीतिकाव्यानि, कथा ग्रन्थाः, निघण्टु (वैदिकशब्द–कोषः), अमरकोशः (लौकिकसंस्कृतशब्दकोषः) संस्कृतसाहित्यस्य अद्भुतानि रत्नानि।

संस्कृतम् अपि अस्माकं वाग्व्यवहारस्य भाषा। अनेकेषु विद्यालयेषु/महाविद्यालयेषु/ विश्वविद्यालयेषु संस्कृतं संस्कृतमाध्यमेनैव पाठ्यते। अतिसमृद्धम् अस्य साहित्यम्। आधुनिकाः वैज्ञानिकाः यत् अद्य विचारयन्ति, तत्तु बहुकालपूर्वमेव संस्कृते निबद्धं वर्तते। आवश्यकता अस्ति प्राच्यविज्ञानस्य शोधस्य।

किं भवन्तः जानन्ति यत् आयुर्वेदः (चिकित्साशास्त्रम्) भूगोलविज्ञानम्, खगोलविज्ञानम्, विमानविज्ञानम्, गणितम्, (शून्यमानम्) ज्यामितिः (शुल्वसूत्रम्), बीजगणितम्, जलविज्ञानम्, अस्त्रविज्ञानम् (ब्रह्मास्त्रम् आदीनि), कृषिविज्ञानम् आदीनि सर्वविधं ज्ञानं संस्कृतभाषायां गौरवान्वितम् आश्चर्यकरं च वर्तते।





## 26.2 संस्कृतभाषायाः विविधरूपता

संस्कृतस्य विशालं क्षेत्रं पठित्वा भवन्तः किं विचारयन्ति? एतदेव यत् भवन्तः केवलं संस्कृतभाषाया उपर्युक्तं प्राच्यं ज्ञान–विज्ञानं सर्वं बोद्धुं समर्थाः। तत्तु न शक्यम्। वस्तुतः संस्कृतम् अपि प्रयोजनमूलकम् एव। यतः संस्कृतसाहित्यं विविधम् अद्भुतं च। अतः संस्कृतभाषायाः प्रयोजनानि अपि विविधानि। यथा हि वेदानां बोधः वैदिकसंस्कृतेनैव भवितुं शक्यते, न तु लौकिकसंस्कृतेन। एवमेव उपनिषदां बोधः तद्भाषया एव भवति, पुराणानां भाषा पृथक् भवति, रामायण–महाभारतयोः भाषा पृथगेव। आयुर्वेदस्य भाषा, जलविज्ञानस्य भाषा, खगोलविज्ञानस्य भाषा, कृषिविज्ञानस्य भाषा, धातुविज्ञानस्य भाषा, गणितस्य भाषा, भूगोल विज्ञानादीनाम् अपि भाषा भिन्ना–भिन्ना भवति। अनेनैव ज्ञायते यत् संस्कृतस्य वाङ्मयं विज्ञातुं क्षेत्रशः भाषा–ज्ञानमपेक्षते। अतः संस्कृतंभाषायाः अपि प्रयोजनानि विविधानि। एतद्विषये साररूपेण वयम् अग्रे पठामः।

## पाठगतप्रश्ना 26.1

1. सांसारिकव्यवहारः कां विना न प्रचलति?

   (क) धनम्   (ख) साहित्यम्

   (ग) भाषाम्   (घ) वेदम्

2. वैदिकशब्दकोषः अस्ति–

   (क) ऋग्वेदः   (ख) निघण्टुः

   (ग) उपनिषद्   (ख) अमरकोशः

3. संस्कृतभाषायाः प्रयोजनानि सन्ति–

   (क) विविधानि   (ख) अद्भुतानि

   (ग) असमीचीनानि   (घ) बोद्धव्यानि

## 26.3 वैदिकं लौकिकं च संस्कृतम्

'संस्कृतम्' भाषादृष्ट्या द्विविधम् वैदिकम् लौकिकम् च। अतः वैदिकसाहित्यम् लौकिकं संस्कृतसाहित्यम् अपि पृथक् पृथक्। अत्र क्रमशः तयोः प्रयोजनमूलकतां वयं पश्यामः।

### (क) वैदिकं संस्कृतम्

भवन्तः इतः पूर्वं वैदिकसाहित्यस्य परिचयं पठितवन्तः। एतं विषयम् उदाहरणमाध्यमेन जानीमः। वस्तुतः वैदिकशब्दानां ज्ञानम् 'निघण्टुः' इति वैदिककोशेनैव सम्यक् भवति। यथा 'अमृतस्य पन्थाः' इति पाठे वैदिकमंत्राणाम् अर्थबोधः भिन्नतरः भवति। पश्यन्तु–

1 2 3

(i) 'इन्द्रः **पृथिव्यै वर्षीयान्** गोस्तु **मात्रा** न विद्यते' (यजुर्वेदः 3.48)

1 2 3

सामान्यार्थः– पृथिवी के लिए। वर्षा से युक्त अंशः/भागः = न उचितः अर्थः।

वैदिकार्थः– पृथिव्याः, वृद्धः/पूर्वजः, तुलना = उचितः अर्थः
(पृथिवी से) (पहले उत्पन्न हुआ/बड़ा) (दो में बराबरी करना)

(ii) 'आत्मानं **रथिनं** विद्धि' अत्र 'आत्मा' रथी अस्ति। अस्य भावार्थः ग्राह्यः रथम् = शरीरम्, शरीरम् अस्ति अस्य = रथी, अर्थात् आत्मानं विना शरीरस्य महत्त्वं नास्ति।

(iii) 'विद्वांसो हि **देवाः**' वेदे 'विद्वान्' देव–पर्यायार्थे विद्यते।

**(ख) लौकिकं संस्कृतम्**

रामायणम्, महाभारतम् अष्टादशपुराणानि, प×चतन्त्रम्, सुभाषितानि, नाट्यम्, प्रहेलिका–पद्यानि, स्मृतिग्रन्थाः, अर्थशास्त्रम् इत्यादीनि संस्कृतवाङ्मयस्य विविधानि रूपाणि। तेषां ज्ञानमपि संस्कृतभाषायाः प्रयोजनमेव। लौकिकसंस्कृतसाहित्यस्य बोधनेऽपि विविधरूपता दृश्यते। यथा–रामायणे–'रामः' महापुरुषत्वेन एव वर्णितः अर्थात् समस्तमानवीयगुणानां स्वरूपंम् एव रामः। महाभारतं तु धर्मज्ञानस्य कोशः एव तत्। पुराणानि अष्टादश। तेषां विविधरूपतां तदध्ययनेन ज्ञातुं शक्नुमः।

प×चतन्त्रे– 'माता शत्रुः पिता वैरी येन बालो न पाठितः'। अस्य सामान्यार्थः तु माता–पितरौ शत्रुरूपौ। अस्य अयं भावः नास्ति यत् अशिक्षितः बालः माता–पितरौ प्रति शत्रुभावेन व्यवहरेत्।

'प्रहेलिकानाम्' विषये भवन्तः द्वितीये पाठे 'यदि जानासि तद् वद' अत्र पठितवन्तः। तासाम् अर्थबोधनप्रकारोऽपि भिन्नरूप एव। एवमेव ''वृक्षाग्रवासी न च पक्षिराजः, त्रिनेत्रधारी न च शङ्करोऽसौ'' अत्र त्रिनेत्रधारी शिवः न, अपितु 'नारिकेलफलम्' एव।

## 26.4 वैज्ञानिकं स्वरूपम्

भवद्भिः पूर्वमेव पठितं यत् अस्माकं प्राच्यविज्ञानम् सुविस्तृतम् अस्ति। अत्रोदाहरणमाध्यमेन आयुर्वेद–गणित–खगोलविज्ञानादिविषये पठामः।


**(क) आयुर्वेदविज्ञानम्** भवन्तः 'शल्यचिकित्साजनकः सुश्रुतः' इति एकविंशं पाठं पठितवन्तः एव। तत्र या शब्दावली वर्तते सा आयुर्वेदीयभाषा। अतः तदनुसारमेव भवद्भिः उक्तपाठस्य अवबोधः कृतः। यथा हि–

''शस्त्राणि षट्प्रकाराणि तद्यथा स्वास्तिकयन्त्राणि, सन्दंशयन्त्राणि, तालयन्त्राणि, नाडीयन्त्राणि, शलाकायन्त्राणि, उपयन्त्राणि चेति। यन्त्राणां मुखानि मृगपक्षिणां मुखैः सदृशानि भवन्ति।''

आयुर्वेदस्य चरकसंहिता, सुश्रुतसंहिता, अष्टांगहृदयम् भावप्रकाशः नैके ग्रन्थाः। एवमेव 'आरोग्यं परमं सुखम्' इति तृतीये पाठे– 'दृष्टिः प्रसादं लभते मरुतश्चोपशाम्यति' अस्य विशेष अर्थः भवद्भिः पठित एव।

विशेषः– द्वादशकक्षायाम् संस्कृतविषयेण सह उत्तीर्णः छात्रः/छात्रा बी.ए. एम.एस इति पञ्चवर्षीयपाठ्यक्रमे प्रवेष्टुमर्हति। राजकीयसेवायां नियुक्त्यै अस्य मानं 'एम.बी.बी.एस.' इति समकक्षं भवति।

(ख) एवमेव 'गणितविषयम् आधारितं विंशं पाठं 'अनन्तः ज्ञानसागरः' भवन्तः पठितवन्तः। तत्र शुल्वसूत्रात् उद्धृतं त्रिभुजमानं पश्यन्तु–




= अब² + बस² = अस²

आर्यभट्टोऽपि महान् गणितज्ञः आसीत्। तेन वृत्तस्य, त्रिभुजस्य, चतुर्भुजस्य, समभुवः च सिद्धिप्रकारम् उपवर्णितम् अस्ति–

वृत्तं भ्रमेण साध्यं त्रिभुजञ्च चतुर्भुजञ्च कर्णाभ्याम्।

साध्याजलेन समभूश्च ऊर्ध्वं लम्बकेनैव।। (आ. भ. 2/13)

अतः गणितसन्दर्भे या भाषा प्रयुक्ता, सैव गणितविज्ञानस्य बोधाय उपयुक्ता।

**(ग) खगोलविज्ञानम्**– अस्माकं ज्यौतिषशास्त्रे नक्षत्राणां गणना, सूर्य–चन्द्र–मंगल–बृहस्पति–शनि ग्रहाणां स्थितिः, पृथिव्याः दूरत्वं, पृथिव्याः गतिः, सूर्य–चन्द्रग्रहणकालः सर्वं खगोलसम्बन्धिचिन्तनं वर्तते।

एकमुदाहरणमत्र पश्यन्तु–

एवं नवकोटय एकपञ्चाशल्लक्षाणि योजनानां मानसोत्तरगिरिपरिवर्तनस्योपदिशन्ति''........ ....। (श्रीमद् भा.पु. 5/31/6)

अर्थात् एवं मानसोत्तरपर्वते सूर्यस्य परिक्रमणमार्गः एकपञ्चाशत्लक्षोत्तरनवकोटियोजनं (95100000 योजनं = 760800000 मीलं) वर्तते।

## संस्कृते प्राच्यविज्ञानस्य महत्त्वम्

भवद्भिः पठितं यत् प्राच्यविज्ञानमपि विविधम् यथा आधुनिकविज्ञानम्। तर्हि को भेदः उभयोः? भेदोऽस्ति प्राकृतिकः, प्रयोगे भेदः, चिन्तने भेदः, परं प्राच्यविज्ञानस्य उपयोगितायां

नास्ति कोऽपि सन्देहः। भवन्तः पातञ्जलमुनेः योगस्य चमत्कारं यत्र तत्र सर्वत्र पश्यन्ति एव। आयुर्वेदस्य चिकित्सापद्धतिः सर्वेषु रोगेषु सफला दृश्यते इति विचारः अमेरिकादेशेऽपि प्रसिद्धः। एवमेव सूर्यादिग्रहाणां गतयः, दूरत्वं स्थितिः च सर्वं ज्योतिश्शास्त्रे निरूपितं वर्तते। एवमेव शून्यसिद्धान्तस्य मान्यता पिंगलेन ई. पू. 200 वर्षे बहुकालपूर्वमेव कृता। प्रथमः भारतीयगणितज्ञः ब्रह्मगुप्तः षष्ठशताब्द्यां शून्यप्रयोगनियमान् निर्मितवान्। एवमेव भौतिकं, रसायनं, रत्नविज्ञानादीनि सर्वविधविज्ञानरत्नानि अस्माकं प्राच्यविज्ञानकोशे सन्ति।

अस्तु अद्य आवश्यकताऽस्ति "प्राच्यविज्ञानस्य आधुनिकविज्ञानेन सह समन्वयः स्यात् तत्र च शोधकार्यंमपि भवेत्। यतः यत् यत् आधुनिकविज्ञानेऽस्ति, तत् तत् संस्कृतविज्ञानेऽपि अस्ति।

## पाठगतप्रश्नाः 26.2

1. यजुर्वेदे 'गोस्तु मात्रा न विद्यते' अत्र 'मात्रा' शब्दस्यार्थः अस्ति–
   (क) गोमात्रम् (ख) अवयवः
   (ग) तुलना (घ) संख्या
2. महाभारतस्य प्रारम्भः अनेन वाक्येन भवति–
   (क) अथ महाभारतकथा (ख) अथातो धर्मजिज्ञासा
   (ग) अथातो ब्रह्मजिज्ञासा (घ) अथेतिहासपुराणम्
3. कः वृत्त–त्रिभुज–चतुर्भुजानां सिद्धिप्रकारं वर्णितवान्–
   (क) वराहमिहिरः (ख) सुश्रुतः
   (ग) श्रीधराचार्यः (घ) आर्यभट्टः
4. ब्रह्मगुप्तः .......................... नियमान् निर्मितवान्–
   (क) शून्यप्रयोगस्य (ख) चिकित्सायाः
   (ग) शिक्षायाः (घ) कल्पस्य

## 26.5 व्यवसायात्मिकानि संस्कृतस्यक्षेत्राणि

भवद्भिः पठितं ज्ञातं च यत् संस्कृतम् अद्यापि देशे विदेशेषु च पठ्यते। अतः संस्कृतज्ञाः विविधक्षेत्रेषु कार्यरताः दृश्यन्ते। संक्षेपतः सम्प्रति प्रयोजनमूलकंसंस्कृतस्य निम्नलिखितानि क्षेत्राणि सन्ति–

**(i) अध्यापनम्**– संस्कृतज्ञानां कृते विद्यालय–महाविद्यालय–विश्वविद्यालयेषु अध्यापनस्य पर्याप्तः अवसरः। तेषां कार्यक्षेत्रं राजकीयसंस्थासु व्यक्तिगतसंस्थासु च सम्मानजनकम्। जीवननिर्वाहाय उत्तमा सेवावृत्तिः।





**(ii) प्रशासनिक सेवा**— संघलोकसेवा—आयोगः विविधप्रशासनिकसेवानां परीक्षां करोति। राज्यस्तरीय—अखिलभारतीयस्तरीयाः परीक्षाः भवन्ति। भारतसर्वकारस्य सर्वोच्च प्रशासनिक सेवा आइ.ए.एस. भवति। संस्कृतज्ञः तु संस्कृतं विकल्पविषयरूपेण स्वीकृत्य तत्परीक्षाम् उत्तीर्य 'भारतीय प्रशासनिक अधिकारी' भवितुं शक्यते। एवमेव राज्यस्तरीय—प्रशासनिक अधिकारी अपि। केचन दिल्ली उच्चन्यायालयस्य मुख्यन्यायाधीशाः अपि संस्कृतज्ञाः आसन्।

**(iii) चिकित्सा**— भवन्तः द्वादशकक्षां संस्कृतविषयेण सह उत्तीर्य पञ्चवर्षीय आयुर्वेदाचार्यस्य पाठ्यक्रमे प्रवेशं लब्ध्वा चिकित्साक्षेत्रे कार्यं कर्तुं शक्नुवन्ति। तत्समकक्षता एमबीबीएस इव भवति।

**(iv) सैनिकक्षेत्रम्**— सेनायां धर्मगुरोः इति पदं नायबसूबेदाररैंक समं भवति। संस्कृतविषयेण सह उत्तीर्णः कोऽपि स्नातकः तत्सम्बन्धिपरीक्षाम् उत्तीर्य धर्मगुरुपदे नियुज्यते।

**(v) प्रसारणक्षेत्रम्**—

(क) **आकाशवाणी**— आकाशवाणीतः (रेडियो) अनेके कार्यक्रमाः बहुकालादेव प्रचलिताः सन्ति। प्रतिदिनं वयं प्रातः सायं च संस्कृत—वार्तानां प्रसारणं शृणुमः। वार्तानां (समाचाराणां) भाषा सामान्या शुद्धा, स्पष्टा, जनसामान्यैः (दशमकक्षापर्यन्तं पठितैः जनैः अपि) श्रुत्वाऽपि ग्राह्या भवेत् इति। यथा—



''अद्य 15 अगस्ते 2008 प्रातः 7.30 वादने अस्माकं प्रधानमंत्री रक्तदुर्गतः समस्तदेशवासिनः समबोधयत्' इति स्थाने यदि समाचारवाचकः ''अद्य प्रातः सार्धसप्तवादने प्रधानमंत्री लालकिलाप्राचीरतः राष्ट्रं सम्बोधितवान्'' इति वदेत् चेत्तर्हि भाषा अधिका सरला सुबोध्या च स्यात्।

(ख) **दूरदर्शनम्**— एवमेव वयं दूरदर्शनेऽपि न केवलं मनोरञ्जकान् ज्ञानवर्धकान्, कार्यक्रमान् पश्यामः अपि तु तत्र प्रातः 6.55 – 7.00 वादनं यावत् संस्कृतसमाचारान् अपि शृणुमः पश्यामः च। तत्र वाचकः प्रत्यक्षं दृश्यते अतः तस्य भाषा न केवलं शुद्धा, स्पष्टाक्षरा, लय—भावपूर्णा च भवति अपि तु तस्य एका विशिष्टा शैली अपि भवति। अर्थात्



घटनाविशेषसन्दर्भानुसारमेव, चित्राणि समाचारवाचकस्य अभिनयात्मिका भावाभिव्यक्तिः अपि च भवति। तेन संस्कृत–समाचाराः रुचिपूर्णाः प्रभावोत्पादकाः च भवन्ति।

आकाशावाणीतः च विविधनाटकानां, संवादानां प्रसारणं क्रियते। दूरदर्शने तु अनेकानि नाटकानि, गीतकाव्यानि प्रसारितानि यथा– भाति मे भारतम्, मृच्छकटिकम्, मेघदूतम्, गीतगोविन्दम् आदीनि। एवमेव संस्कृतचलचित्रे अपि प्रसारिते– आदिशंकराचार्यः, श्रीमद्भगवद्गीता च।

अतः प्रतिसाहित्यं प्रतिविज्ञानं विविधाः पारिभाषिकशब्दाः भवन्ति येषां ज्ञानेन एव तत् तत् भाषास्वरूपं जानीमः।

## 26.6 संस्कृतपत्रकारिता

आधुनिके युगे 'पत्रकारिता' सञ्चारक्षेत्रे महत्त्वपूर्णः विषयः अस्ति। उपर्युक्तं प्रसारणम् अपि पत्रकारितायाः क्षेत्रम्। एतं विषयं प्रति प्रतिदिनं युवकानाम् अभिरुचिः वर्धते एव।

संस्कृत–पत्र–पत्रिकाणां प्रकाशनमपि 'प्रयोजनमूलकमेव। प्रसारणे श्रव्यस्य दृश्यस्य च प्राधान्यं भवति। परं पत्र–पत्रिकाणां भाषाशैली श्रव्यभाषायाः भिन्ना एव भवति। अत्र लेखनकौशलस्य प्राधान्यं भवति। संस्कृत–पत्रिकाणां भाषाऽपि विषयानुरूपा, सरला, रुचिकरा, सर्वजनबोध्या च भवति। विषयगत संस्कृत–पत्रिकाणाम् अध्ययनं वयम् अग्रिमे पाठे करिष्यामः।

किं भवन्तः किमपि संस्कृतसमाचारपत्रं, कामपि संस्कृतपत्रिकां पठितवन्तः? वयं बोधामः यत् तत्र भाषाऽपि विषयानुरूपा भिन्ना एव।

भवन्तः संस्कृतपत्रकारितायाः विषये विस्तरेण अग्रिमे पाठे पठिष्यन्ति। अत्र तु भाषादृष्ट्या विषयगतचर्चां सारतः कुर्मः। यथा–

(क) **व्यक्तिपरिचयः** यदा संस्कृत पत्र–पत्रिकासु विशिष्टव्यक्तेः परिचयः दीयते तदा तस्य भाषा विवरणात्मिका भवति। व्यक्तेः वैशिष्ट्यं कोष्ठकेऽपि स्थूलाक्षरैः लिख्यते।

(ख) **वस्तु–परिचयः** कस्यापि वस्तुनः परिचयः गुणदोषरूपेण पत्रिकायां दीयते। अतः तस्य भाषाऽपि वस्तुनः विशेषतानुसारमेव भवति। यथा दूरदर्शनयन्त्रम्, चलदूरवाणी, किमपि कारयानम् ...... आदीनि।

(ग) **विज्ञापनम्** व्यावसायिकदृष्ट्या विज्ञापनस्य विशिष्टं महत्त्वम् अस्ति। विज्ञापनं विविधं भवति। यथा– व्यवहारोपयोगिवस्तूनाम्, औषधीनां, स्वास्थ्यकेन्द्राणां, शैक्षणिक् संस्थानां, पत्रिकाणाम्। प्रत्येकं विज्ञापनस्य भाषा तद् तद् विषयानुरूपा प्रभावमयी च भवति। स्वयमेव पत्र–पत्रिकासु विज्ञापनभाषां पश्यन्तु।

(घ) **व्यंग्यचित्रं** कार्टूनम् इति कथ्यते। एतत् चित्रं प्रेरकं मनोरञ्जकं च भवति। तस्य भाषा अतीव संक्षिप्ता, प्रहारमयी, तीक्ष्णा, प्रभावमयी च भवति।

(ङ) **उद्घोषणा–** पत्रिकायाम् पत्रे वा 'उद्घोषणा' अपि कोष्ठके दीयते। यथा– 'बिहार बाढ़–पीडित–सहायता कोशः' विशेषांकस्य उद्घोषणा, संस्थायाः स्थानपरिवर्तनस्य उद्घोषणा। उद्घोषणानुरूपा भाषा अपि विशिष्टा भवति।

(च) **सूक्तयः–** पत्रिकायां विविधाः सूक्तयः प्रेरणाप्रदाः शिक्षाप्रदाः प्रदीयन्ते। परं भाषावैशिष्ट्यं, भाववैशिष्ट्यम् भिन्नमेव। यथा– विद्याविहीनः पशुः। आचारः प्रथमः धर्मः, कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

(छ) **शीर्षकम्–** शीर्षकं तु भावद्योतकम् भवेत्। अतः तत्कृते उपयुक्तः शब्दः शब्दावलिः वा भवेत्। यथा काश्मीरस्य वर्णने– 'भूमेः स्वर्गः', प्रकृतिवैभवम् वा भवितुं शक्यते, न तु 'पर्वतीयप्रदेशः' सुदरः प्रदेशः वा।

(ज) **सारः–** पत्रिकायाम् कस्यापि समाचारस्य सम्मेलनस्य सांस्कृतिकगतिविधेः राजकीयनिर्णयस्य सारलेखनं स्थूलाक्षरैः पृथगेव लिख्यते। सरलभाषायां अल्पशब्देषु तथ्यनिरूपणम् अपेक्षितं भवति।




(झ) **पल्लवनम्–** पत्र–पत्रिकासु वाञ्छितसूचनायाः सर्वकारीय–योजनायाः, शैक्षिकयात्रायाः दुर्घटनावृत्तस्य वा पल्लवनम् (विस्तारः) अपि क्रियते। तद्भाषाऽपि तदनुरूपा सुबोध्या विषयस्य स्पष्टकरी च भवेत्।

(ञ) **मुद्रणत्रुटिसंशोधनम्–** कस्यापि विषयस्य/लेखस्य वा प्रकाशनात्पूर्वं मुद्रणे त्रुटीनां संशोधनं विशिष्टप्रकारेण भवति। येन पत्रिकायाः प्रकाशनं पूर्णं शुद्धं भवेत्। अस्मिन् विषयेऽन्तिमे पाठे विस्तरेण बोधामः।

(ट) **विविध–ज्ञान–विज्ञानविषयाः** यद्यपि अनेकाः शोधपत्रिकाः अपि भवन्ति तथापि सामान्यपत्रिकासु अपि ज्ञान–विज्ञानविषयाणां समावेशः भवति। नूतनशोधकार्याणां विवरणं दीयते। प्राच्य–ज्ञान–विज्ञानयोः युगीनं समीक्षणं चापि प्रस्तुतं क्रियते येन भवन्तः संस्कृतभाषायां निहितज्ञानविज्ञानयोः विविधक्षेत्रेषु उपयोगं करिष्यन्ति। यथा ''नूतनः शोधः''– शाकाहारेण दीर्घायुः नीरोगश्च भवेत् जनः।



(ठ) **निमंत्रणपत्रम्/अभिनन्दनपत्रम्/वर्धापनपत्रम्–** संस्कृते निमंत्रण पत्र–अभिनन्दनपत्र–वर्धापनपत्राणां मुद्रणं भवति। तेषां च समाजे उपयोगः भवति। तेषां भाषा अपि विशिष्टा, विनम्रतायुक्ता भवति।

## पाठगतप्रश्नाः 26.3

1. पाठ्यक्रमे संस्कृतस्य ज्ञानम् अनिवार्यतया अपेक्षते।

   (क) एम.सी.ए. (ख) बी.ए.एम्.एस्.

   (ग) एम्.बी.बी.एस्. (घ) एम.बी.ए.

2. संस्कृते प्रसारणे श्रव्यं दृश्यं चानुभवामः ..............।

   (क) आकाशवाण्याम् (ख) गोष्ठ्याम्

   (ग) दूरदर्शने (घ) विद्यालये

3. अस्य भाषा अतीव संक्षिप्ता तीक्ष्णप्रभावा प्रहारमयी च भवति–

   (क) विज्ञापनस्य (ख) व्यंग्यचित्रस्य

   (ग) उद्घोषणायाः (घ) शीर्षकस्य

## 26.7 किम् अधिगतम्

- संस्कृतं प्रयोजनमूलकभाषा अस्ति।
- क्षेत्रशः संस्कृतभाषायाः विविधानि प्रयोजनानि सन्ति।
- स्वरूपदृष्ट्या संस्कृतस्य द्वे रूपे वैदिकसंस्कृतं लौकिकसंस्कृतं च।
- विषयगतसंस्कृतम् अपि भिन्नं भिन्नमेव।
- संस्कृतज्ञानां कृते जीवन–निर्वाहाय पर्याप्ताः अवसराः सन्ति।
- संस्कृतपत्र–पत्रिकासु ज्ञानविज्ञानमयाः लेखाः, विज्ञापनं, मनोर×जनं, खेलवृत्तं, व्यंग्यचित्राणि च भवन्ति।

## 26.8 योग्यताविस्तारः

- भवन्तः पुस्तकालयं गत्वा संस्कृतसमाचारपत्रं हिन्दीसमाचारपत्रं च पठित्वा ज्ञायताम् तयोः का भिन्नता समानता वास्ति।
- आकाशवाणी–दूरदर्शनयोः समाचारान् श्रुत्वा तयोः विषयगत–भाषागत–तुलनां कुरुत।
- संस्कृत–पत्र–पत्रिकासु प्रकाशितवैज्ञानिकसमाचाराणां लेखानां वा सूचीं रचयत।

## 26.9 पाठान्तप्रश्नाः

1. प्रयोजनमूलकसंस्कृतं किं भवति? स्पष्टयत।
2. संस्कृत–साहित्यस्य परिचयं पञ्चवाक्येषु लिखत।
3. प्राच्यविज्ञानस्य षड् नामानि लिखत।
4. प्रसारणभाषायाः कांश्चित् चतुरः गुणान् लिखत।
5. संस्कृतपत्रकारितायाः केषाञ्चित् पञ्चक्षेत्राणां नामानि लिखत।

## 26.10 उत्तराणि

**पाठगतप्रश्नाः**

| | | | | |
|---|---|---|---|---|
| **26.1** | 1. (ग) | 2. (ख) | 3. (क) | |
| **26.2** | 1. (ग) | 2. (ख) | 3. (घ) | 4. (क) |
| **26.3** | 1. (ख) बी.ए.एम्.एस्. | 2. (ग) | 3. (ख) | |

**पाठान्तप्रश्नाः**

छात्राः स्वयं पठित्वा प्रश्नान् उत्तरन्तु।

# 27

# जनस×चारमाध्यमः

विविधाः सूचनाः अधिगन्तुम् अस्माभिः अनेके स×चारमाध्यमाः प्रयुज्यन्ते। तेषु वार्त्तापत्राणि, आकाशवाण्याः प्रसारणानि, दूरदर्शनस्य प्रसारणानि, अन्तर्जालके (इण्टरनेट) निक्षिप्तानि विवरणानि च अन्यतमानि सन्ति। एभिः माध्यमैः जनैः युगपदेव अनेकाः सूचनाः लभ्यन्ते। एते माध्यमाः नूनमेव अस्माकं ज्ञानं वर्धयन्ति, मनोर×जयन्ति, उपयोगिनीं शिक्षा×च प्रयच्छन्ति। अस्मिन् पाठे एषाम् एव जनस×चारमाध्यमानां विषये वयं पठामः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- जनस×चारमाध्यमस्य अभिप्रायं विशदीकरिष्यति;
- विविधजनस×चारमाध्यमानां सूचीनिर्माणं विधास्यति;
- आकाशवाणीतः प्रसार्यमाणानां विविधसंस्कृतकार्यक्रमाणां विवरणं लेखिष्यति;
- दूरदर्शने अन्यासु च दृश्यश्रव्यप्रणालिकासु (Audo-Visual Channels) प्रसार्यमाणानां विविधसंस्कृतकार्यक्रमाणां परिचयं दास्यति;
- आकाशवाणीदूरदर्शनयोः वार्तानां स्रोतांसि उद्धरिष्यति;
- आकाशवाणी–दूरदर्शनाभ्यां प्रसारितानां संस्कृतवार्त्तानां निर्माणप्रक्रियाविषये विभेदं करिष्यति।

## क्रियाकलापः

आकाशवाण्याः दूरदर्शनस्य च काश्चन प्रणालिकाः अधोलिखिताः सन्ति। ताः अधः प्रदत्ते वर्गद्वये विभज्य लिखत।

राजधानी प्रणाली, ज्ञानदर्शनम्, 'डी.डी. स्पोर्टस' इति, नेशनल प्रणाली, इन्द्रप्रस्थप्रणाली, 'एन.डी.टी.वी.', 'आजतक' इति, 'स्टारन्यूज' इति, 'एफ एम' इति।

| आकाशवाणी प्रणालिकाः | दूरदर्शनप्रणालिकाः |
|---|---|
| .......................................... | .......................................... |
| .......................................... | .......................................... |

## 27.0 अधुना अवगच्छामः

### जनस×चारमाध्यमः

येन माध्यमेन जनसामान्यं प्रति विविधसमाचाराणां सन्देशानां वार्त्तानां च सम्प्रेषणं भवति सः एव जनस×चारमाध्यमः कथ्यते।

## 27.1 जनस×चारमाध्यमानां विविधता

जनसञ्चारमाध्यमाः स्थूलतया द्विधा विभक्तुं शक्यन्ते

(क) मुद्रणमाध्यमः (प्रिन्टमीडिया)

(ख) वैद्युदान्विकमाध्यमः च (इलेक्ट्रानिक मीडिया)

**(क) मुद्रण–माध्यमः**

जनसञ्चारस्य मुद्रणमाध्यमेषु विविधः पत्रपत्रिकाः भवन्ति। संस्कृतभाषायां शताधिकाः पत्रपत्रिकाः प्रकाश्यन्ते। आसां विषये एकस्मिन् पृथगध्याये भवद्भिः पठितव्यमेव। अत्र केवलं वैद्युदान्विकमाध्यमस्य एव चर्चा क्रियते।

**(ख) वैद्युदान्विकमाध्यमः**


जनसञ्चारस्य वैद्युदान्विकमाध्यमः द्विविधः भवति –

(क) श्रव्यमाध्यमः (ऑडियो मीडिया)

(ख) दृश्यश्रव्यमाध्यमः च (ऑडियो विजुअल मीडिया)


**(क) श्रव्यमाध्यमः**

जनस×चारस्य श्रव्यमाध्यमेषु सर्वाधिकं प्रमुखता आकाशवाण्याः अस्ति। आकाशवाणीतः अनेकविधाः संस्कृत–कार्यक्रमाः प्रसार्यन्ते। तेषु केचन नियताः कार्यक्रमाः सन्ति, अपरे च अनियताः कार्यक्रमाः। नियत–कार्यक्रमेषु प्रमुखतमो वर्तते संस्कृतवार्त्तानां प्रसारणम्। आकाशवाण्याः दिल्लीकेन्द्रात् संस्कृतवार्त्तानां प्रसारणं विधीयते, यद्धि निखिलेऽपि राष्ट्रे श्रोतुं शक्यते। प्रादेशिककेन्द्रैः अपि तत्प्रसारणं विधीयते।



27.1

संस्कृतभाषायां वार्त्तानाम् आद्यं वाचनं भारतदेशे आकाशवाणीतः 1974 तमे वर्षे जूनमासे त्रिंशत्–तमे दिवसे प्रातः नववादने अभवत्। एतद् वाचनं सुश्रियः विजयश्रियः स्वरैः अनुष्ठितम्। अत्र ज्ञेयं वर्तते यद् इतः पूर्वमपि जर्मनीदेशस्य श्रव्यप्रसारण–माध्यमकेन्द्रात् संस्कृतभाषायां साप्ताहिकं वार्त्ताप्रसारणं भवति स्म। सम्प्रति आकाशवाण्याः दिल्लीकेन्द्रात् संस्कृतवार्त्ताः प्रतिदिनं द्विवारं प्रसारिताः भवन्ति।



27.2

प्रातः – 6.55–7.00 वादने

सायम् – 6.10–6.15 वादने

एताः वार्त्ताः अन्तर्जालके www.newsonair.com इति संकेते सर्वदा श्रोतुम् उपलभ्यन्ते।

संस्कृतवार्त्ताः अतिरिच्य आकाशवाण्याः नियतकार्यक्रमेषु उल्लेखम् अर्हति वार्षिकं सर्वभाषाकविसम्मेलनम्। स्वातन्त्र्य–दिवसावसरे आयोजिते अस्मिन् सम्मेलने संस्कृतभाषायाः अपि कश्चन सुकविः आमन्त्र्यते, येन संस्कृतकाव्यानां पाठः क्रियते।

एतदतिरिच्य अनेके अनियताः कार्यक्रमाः अपि आकाशवाणीतः संस्कृतभाषायां प्रसारिताः भवन्ति। तथाहि, काले काले कतिपयसंस्कृतरूपकाणां प्रस्तुतिः प्रसार्यते। प्रसारितेषु संस्कृतरूपकेषु 'पण्डितराजीयम्', 'धर्मचक्रं प्रवर्तताम्' 'यास्यत्यद्य शकुन्तला', 'मोक्षमूलरवैदुष्यम्', 'आषाढस्य प्रथमे दिवसे' इत्यादीनि अन्यतमानि सन्ति। एवमेव, यदा–कदा संस्कृतकविसम्मेलनान्यपि आयोजितानि भवन्ति। कदाचित् कमपि महत्त्वपूर्णं सांस्कृतिकं साहित्यिकं सामाजिकं वा विषयम् अवलम्ब्य संस्कृतविदुषां परिचर्चा अपि समायोज्यते। प्रायेण पञ्चविंशतिवर्षेभ्यः पूर्वं यदा अखिलभारतीयप्राच्यविद्यासम्मेलनस्य (All India oriental conference) अधिवेशनं गुवाहाटीनगरे सम्पन्नम् अभवत् तदा तत्सम्मेलनस्य सविस्तृतविवरणं प्रस्तोतुम् आकाशवाणी स्वीयसंस्कृतैकांशस्य प्रवाचकं गुवाहाटीनगरं प्रेषितवती। अद्य सम्पूर्णे भारतदेशे संस्कृतभाषायां बहवः कार्यक्रमाः नैकाभिः संस्थाभिः आयोज्यन्ते। एषां कार्यक्रमाणां प्रमुखांशानां प्रस्तुतिः आकाशवाण्या विधातुं शक्यते।

## क्रिया–कलापः–2

आकाशवाणीतः प्रसारितस्य कस्यचित् संस्कृत–कार्यक्रमस्य/वार्त्तायाः वा श्रवणं कृत्वा सारांशं लिखत।

### ख. दृश्यश्रव्यमाध्यमः

जनसञ्चारस्य दृश्यश्रव्यमाध्यमेषु सर्वाधिका पुरातनी प्रणालिका कार्यक्रमवाहिका वा (channel) 'दूरदर्शनं' वर्तते। भवद्भिः ज्ञेयं यत् या कापि दृश्यश्रव्यप्रणालिका 'दूरदर्शनम्' नैव उच्यते। केवलं भारतशासनस्य साक्षान्निर्देशने 'प्रसारभारती' इति स्वायत्तसंस्थया परिचालिता प्रणालिका एव 'दूरदर्शनम्' कथ्यते। आदौ एका इयमेव प्रणालिका भारते उपलब्धा आसीत्। तदा अस्यां प्रणालिकायां काले–काले संस्कृतस्य अनेके कार्यक्रमाः प्रदर्शिताः अभवन्। अधोलिखितायां तालिकायां केषाञ्चित् कार्यक्रमाणां विवरणं प्रदीयते–



27.3

| कार्यक्रमः | विवरणम् |
|---|---|
| 'सोमप्रभाविवाहः'' नाटकम्' | दूरदर्शने प्रस्तुतं सर्वप्रथमं संस्कृतनाटकम्। |
| भगवदज्जुकीयम्!' संस्कृतप्रहसनम् | धारावाहिकक्रमेण प्रसारितम्। |
| भाति मे भारतम्' राष्ट्रभक्तिभावभरितं गीतिकाव्यम्' | कतिपयमासेभ्यः धारावाहिक रूपेण प्रसारितम् । |
| साप्ताहिकी' एक : साप्ताहिकसंस्कृतकार्यक्रमः 'आदिशङ्कराचार्यः' चलचित्रम्' | अनेकवर्षेभ्यः प्रसारितः। अस्मिन् कार्यक्रमे श्लोकगायन–प्रश्नोत्तरीनिबन्धपाठादयः बहुविधाः कार्यक्रमाः प्रस्तुताः। |
| रघुवंशम्' काव्यस्य नाट्यरूपान्तरम् | एतत् संस्कृतभाषायां निर्मितं प्रथमं चलचित्रम् अस्य निर्माणं जी. वी. अय्यरमहादयेन कृतम्। दूरदर्शनतः अस्य प्रसारणम् अनेकधा जातम्। |
| सुविख्यातस्य संस्कृतविदुषः जीवनं, व्यक्तित्वं कृतित्वञ्च | द्विवर्षपूर्वं धारावाहिकक्रमेण प्रसारितम्।अर्द्धहोरात्मकं वृत्तचित्रं प्रस्तुतम्। |

अद्यापि दूरदर्शनेन अनेके संस्कृतकार्यक्रमाः निर्मीयन्ते प्रसार्यन्ते च। श्रावणमासस्य पौर्णमास्यां संस्कृतदिवसे दूरदर्शनेन संस्कृतकविसम्मेलन–संस्कृतविद्वद्गोष्ठीप्रभृतयः कार्यक्रमाः प्रसार्यन्ते।

## 27.2 दूरदर्शनस्य प्रणालिकाः

सम्प्रति दूरदर्शनस्यापि, अनेकाः प्रणालिकाः सन्ति– डी.डी. न्यूज, डी.डी स्पोर्ट्स, डी.डी ज्ञानभरती।

आसु डी.डी. न्यूज, डीडी ज्ञानदर्शनम् इत्यनयोः द्वयोः प्रणालिकयोः संस्कृतकार्यक्रमाणां नियतं प्रसारणं भवति।

डी.डी. न्यूज – दूरदर्शने संस्कृतवार्त्ताणां प्रथमं प्रसारणं 1994 तमे वर्षे अगस्तमासे एकविंशे दिवसे श्रावणीपूर्णिमावसरे रविवासरे अभवत्। ततः प्रभृति प्रतिरविवासरम् एतद् दशकलावधिकं संस्कृतवार्त्तावृत्तम् अष्टवर्षपर्यन्तं नियमितरूपेण अपराह्णे प्रसारितम् अभवत्। 2002 तमे वर्षे अगस्तमासस्य द्वाविंशदिवसात् शुक्रवासरात् दूरदर्शनतः संस्कृतवार्त्तानां दैनिकं प×चकालावधिप्रसारणं प्रारब्धम्। एतत् प्रसारणं प्रातः काले दश–वादनाद् आरभते स्म। परं सम्प्रति दूरदर्शने संस्कृतवार्त्ताप्रसारणं प्रत्यहं प्रातः 6.55–7.00 वादनं यावद् भवति। इदानीम् एतत् संस्कृतवार्त्ताप्रसारणं दूरदर्शनस्य 'डी.डी.न्यूज' प्रणालिकातः प्रसार्यते।

### डीडी ज्ञानदर्शनम्

दूरदर्शनस्य 'डीडी ज्ञानदर्शनम्' इति प्रणालिकातः अपि नियतं संस्कृतप्रसारणं विधीयते। एषा प्रणालिका प्रतिसप्ताहं त्रिषु दिनेषु एकहोरावधिकं संस्कृतकार्यक्रमं प्रसारयति।

अर्द्धहोरावधिके कार्यक्रमे संस्कृतमाध्यमेन संस्कृतभाषायाः प्रशिक्षणं क्रियते। अपरे अर्द्धहोरावधिके कार्यक्रमे काव्यपाठ–शास्त्रचर्चा–श्लोकावृत्ति–विद्वद्भाषणादिरूपात्मकाः कार्यक्रमाः प्रसार्यन्ते। एते सर्वेऽपि कार्यक्रमाः राष्ट्रिय–संस्कृतसंस्थानम् इति मानितविश्वविद्यालयेन निर्मिताः भवन्ति। राष्ट्रियसंस्कृतसंस्थानस्य नवदिल्लीस्थे कार्यालये एषां प्रसारितानां कार्यक्रमाणां सान्द्रध्वनिपट्टिकाः (सीडी) विक्रयार्थम् उपलब्धाः सन्ति।

दूरदर्शनम् अतिरिच्य अपि इदानीं देशे बह्व्यः अपराः प्रणालिकाः सन्ति। तासु काश्चन् प्रणालिकाः यदा–कदा संस्कृतकार्यक्रमान् प्रसारयन्ति। यथा एकस्यां प्रणालिकायां कतिपयमासान् यावत् 'ऊर्जासंरक्षणयोग' नामकः एकः कार्यक्रमः प्रतिसप्ताहं द्विवारं प्रसारितः अभवत्। अस्मिन् कार्यक्रमे भगवद्गीतायाः श्लोकान् प्रस्तूय तेषां व्याख्यानमपि प्रास्तूयत।

एवमेव अपरस्याम् एकस्यां प्रणालिकायां स्वामिप्रकाशानन्द–सरस्वतीमहाभागेन 'ब्रह्मसूत्रम्' इति प्रसिद्धं ग्रन्थरत्नम् आश्रित्य आंग्लभाषायाम् अनेकानि व्याख्यानानि प्रदत्तानि। सम्प्रति 'संस्कृत की दुनिया' नाम्ना एकः महत्त्वपूर्णः कार्यक्रमः विनिर्मीयते।

## पाठगतप्रश्ना 27.1

1. आकाशवाणीतः दूरदर्शनात् च प्रसारितानां पञ्चकार्यक्रमाणां नामानि लिखत।
2. दूरदर्शनस्य त्रयाणां प्रसिद्धप्रणालीनां नामानि लिखत।
3. दूरदर्शनप्रणालिकातः प्रदर्शितानां केषाञ्चित् पञ्चकार्यक्रमाणां नामानि लिखत।

रिक्तं स्थानं पूरयत –

(क) संस्कृतवार्त्तानां प्रसारणम् आकाशवाण्याः ............................ केन्द्रात् भवति।

(ख) आकाशवाण्याः वार्त्ताः अन्तर्जालके................ इति संकेते सर्वदा श्रोतुं शक्यन्ते।

(ग) संस्कृतवार्त्तानां प्रसारणम् आकाशवाणीतः............... तमे वर्षे प्रारब्धम्।

(घ) दूरदर्शने संस्कृतवार्त्तानां दैनिकं प्रसारणं................ तमे वर्षे आरब्धम्

(ङ) दूरदर्शने संस्कृतवार्त्ताप्रसारणं प्रतिदिनं प्रातःकाले.................. वादने समारभते।

## 27.3 आकाशवाणी–दूरदर्शनयोः वार्त्ता–स्रोतांसि

जनसञ्चारस्य सर्वेषामपि माध्यमानां वार्त्तानां स्रोतांसि प्रायेण त्रिविधानि भवन्ति। तथा हि

(क) वार्ताभिकारणानि (न्यूज एजेन्सीज)

(ख) प्रशासनिकविज्ञप्तयः (सर्कुलर्स आफ गर्वनमेण्ट)

(ग) स्वीयाः वार्त्ताहराश्च (ओन जर्नलिस्ट्स / रिपोर्टर्स)

**(क) वार्त्ताभिकरणानि**

जगति अनेकानि वार्त्ताभिकरणानि सन्ति। विश्वस्य सुदूरक्षेत्रेभ्यः वार्त्ताः संकलय्य एतानि हि जनसञ्चारस्य विविधेभ्यः माध्यमेभ्यः ताः विक्रीणन्ति। एषु वार्त्ताभिकरणेषु अन्यतमानि सन्ति– 'रायटर', 'एपी', 'तासु' 'इरना' चेति। भारतदेशस्य वार्त्ताभिकरणेषु द्वे प्रमुखे स्तः–

– 'यूनाइटेड न्यूज ऑफ इण्डिया' (यू. एन. आई.)
– 'प्रेस ट्रस्ट ऑफ इण्डिया' (पी.टी.आई.) चेति।

एतद् वार्त्ताभिकरणद्वयं हिंदीभाषायाम्, आंग्लभाषायां, अपरासु च भारतीयभाषासु संवाद–समितीः प्रचालयति।

**(ख) प्राशासनिकविज्ञप्तयः**

वार्त्ताः अधिगन्तुं द्वितीयं प्रमुखं स्रोतः भवति–प्रशासनिकविज्ञप्तयः। एताः विज्ञप्तयः प्रशासनेन उत वा प्रशासनिकसंस्थाभिः काले–काले प्रकाशनार्थं प्रसार्यन्ते। आभिः विज्ञप्तिभिः लब्धाः सूचनाः आकाशवाणीदूरदर्शनाभ्यां वार्त्तारूपेण प्रयुज्यन्ते।

**(ग) स्वीयाः वार्त्ताहराः**

वार्त्तानां तृतीयं स्रोतो भवति आकाशवाण्याः दूरदर्शनस्य च स्वीयाः वार्त्ताहराः। एते विविध–स्थानानि गत्वा स्वयं सूचनाः आहरन्ति, ताश्च वार्त्तारूपेण प्रेषयन्ति। ईदृशानां वार्त्तानां प्रसारणकाले ज्ञाप्यते– 'अस्माकं वार्त्ताहरः सूचयति...इति।

## 27.4 आकाशवाण्यां वार्त्ता–निर्माणप्रक्रिया

**वार्त्तापदस्य अर्थः**

सर्वप्रथमं तु इदं ज्ञेयं यत् हिन्दीभाषायां यत् 'समाचार' इति उच्यते, उत वा आंग्लभाषायां 'न्यूज' इति कथ्यते तत् हि संस्कृतभाषायां जनसञ्चारमाध्यमेषु 'वार्त्ता' इति पदेन व्यपदिश्यते। आंग्लभाषायां यत् 'टॉक' इति उच्यते, हिंदीभाषायां च यत्कृते 'वार्त्ता' शब्दः प्रयुज्यते तत्कृते आकाशवाणी–दूरदर्शनयोः 'संभाषणम्' इति प्रयुक्तं भवति।

**वार्त्तानिर्माणम्**

सा वार्त्ता कथं निर्मीयते इत्यत्र पठामः। आकाशवाणीभवने एकः बृहदाकारकः 'वार्त्ताकक्षः' वर्तते। तत्र विविधस्रोतोभ्यः लब्धाः सूचनाः भवन्ति। अपि च, तत्र अहर्निशं नूतनाः सूचनाः प्राप्यन्ते। तस्मिन् कक्षे अनेके सम्पादकाः उपविशन्ति। एते सम्पादकाः ताः सूचनाः सम्पादयन्ति। आकाशवाणीतः अनेकासु भाषासु वार्त्ताप्रसारणं भवति। अतश्च एते सम्पादकाः

सर्वासां भाषाणां कृते सूचनानां सम्पादनं कुर्वन्ति। एकः सम्पादकः प्रायेण तिसृणां चतसृणां वा भाषाणां कृते सूचनाः सम्पाद्य वार्त्तानिर्माणं करोति। एताः वार्त्ताः आंग्लभाषायां निर्मिताः भवन्ति। वार्त्तासम्पादकाः एतत् मनसि विधाय वार्त्तासम्पादनं कुर्वन्ति यत् कस्याः भाषायाः कृते कतमाः वार्त्ताः आवश्यकाः सन्ति। तथाहि, भारतीयभाषाभ्यः प्रदीयमानानां साहित्याकादमी–पारितोषिकानां यदा घोषणा भवति तदा संस्कृत–वार्त्ताभ्यः निर्मितवार्त्तासु संस्कृताय लब्धपारितोषिकस्य विदुषो नामोल्लेखः अवश्यमेव क्रियते।




27.4

तदनु आंग्लभाषायां निर्मिताः एताः वार्त्तापृष्ठाः एकैकशः तत्तद्भाषैकांश प्रकोष्ठे (लैंगुएज युनिट यम) प्रेष्यन्ते। संस्कृतभाषेकांशप्रकोष्ठे द्वौ संस्कृतज्ञौ उपविशतः। तौ उभौ अपि संभूय 'वार्त्ताकक्षतः प्रेषितवार्त्तानां संस्कृतानुवादं कुरुतः। अपि च ताभ्यां वार्त्तानां यथेष्टं यथानिर्दिष्टं च ईषत्सम्पादनमपि विधीयते। एतौ संस्कृतसम्पादकौ संस्कृतवार्त्ता–प्रसारणात् प्रायेण होराद्वयपूर्वं कार्यालयम् आगच्छतः। तदनु तयोः सकाशं वार्त्तापृष्ठाः प्रेष्यन्ते। एकस्मिन् वार्त्तापृष्ठे प्रायशः चतस्रः वार्त्ताः भवन्ति। यदि कापि वार्त्ता अति महत्त्वपूर्णा भवति तदा विस्तरकारणात् एषा पृष्ठपरिमिता अथवा सार्धैकपृष्ठपरिमिताऽपि भवति। यथा हि संसदि आयव्ययपत्रके प्रस्तुते सति आयव्ययपत्रकविषयिणी वार्त्ता सविस्तरेण दीयते।

यतो हि लोकानां रुचिः एतद् ज्ञातुं भवति यत् केषां वस्तूनां मूल्यवृद्धिर्जाता, केषां पदार्थानां मूल्यह्रासः विहितः, कानि कानि च विशिष्टानि आर्थिक–सौविध्यानि प्रशासनेन प्रस्तावितानि इति। प्रायेण पञ्चसंख्याकाः षट्–संख्याकाः वा वार्त्तापृष्ठाः लभ्यन्ते। वार्त्ताप्रसारणात् प्रायः दश–पञ्चदशकलापूर्वं मुख्यवार्त्ताः प्राप्यन्ते। मुख्यवार्त्तानां संख्या प्रायेण चतुर्मिता पञ्चमिता वा भवति। पञ्चकलात्मके वार्त्ताप्रसारणे न्यूनातिन्यूनं तिसृणां मुख्यवार्त्तानां प्रसारणम् अपेक्ष्यते। यदि मुख्यवार्त्ताः संक्षिप्ताः भवन्ति तदा चतस्रः पञ्च वा मुख्यवार्त्ताः अपि प्रसारिताः भवन्ति।

## संस्कृतवार्त्ता प्रसारण–प्रकिया

अत्र संस्कृतवार्त्ताप्रसारण–प्रक्रिया प्रवाहचित्रमाध्यमेन (Flow chart) प्रदर्श्यते –




लब्धवार्त्तानां संस्कृतभाषायाम् अनुवादः महत्सावधानतया करणीयो भवति।

- अनुवादे सरलं लोकप्रसिद्धं संस्कृतं प्रयोज्यम्
- वाक्यरचनासु समासबाहुल्यं परिहार्यम्।
- शास्त्रीया, प्रौढ़ा, उत वा अलंकृता पदावली उपेक्षणीया।
- सर्वाधिकं कठिनं कर्म भवति नूतनपदानां निर्माणकार्यम्।

आंग्लभाषायां प्रदत्तासु वार्त्तासु बहूनि तादृंशि पदानि भवन्ति यानि हि संस्कृतवाङ्.मये सर्वथा अनुपलब्धानि। तत्कृते अभिनवानि पदानि रचनीयानि भवन्ति। तद् यथा – अपार्टमेन्ट्स (Apartments) शॉपिंग मॉल्स (Shopping Malls), सॉफ्टवेयर (Software),

वीडियो–कॉन्फ्रेंसिंग (Video-conferencing) इत्यादयः सर्वथा नूतनाः शब्दाः सन्ति। अत एव एतादृशानां शब्दानां कृते नूतनाः भावबोधकाः शब्दाः निर्मीयन्ते।

**वार्त्ताप्रसारणकक्षः**

एषः कक्षः तु शब्दानुकूलितो (Sound proof) वर्तते। सकलः एव आकाशवाणीभवनपरिसरः वातानुकूलितः अस्ति। अतश्च वार्त्ताप्रसारणकक्षः अपि वातानुकूलितः तु वर्तते एव। शब्दानुकूलिते अस्मिन् कक्षे बहिर्जायमानः कोऽपि कोलाहलः न प्रविशति। कक्षे प्रवाचकः आसन्दिकायाम् उपविशति। तस्य सम्मुखं ध्वनि–प्रापकयन्त्रं (Mike) भवति। अपि च, सम्मुखम् एव भित्तौ एका 'प्लैटिनम–निर्मिता' सुबहुमूल्यात्मिका घटिका स्थापिता, या हि विशेषेण शुद्धं समयं प्रदर्शयति। अपरस्यां भित्तौ एकः प्रकाशदीपः भवति। यदेव कस्यचिद् वार्त्तावृत्तस्य समयः प्रारभते तदैव सः प्रकाशदीपः रक्तवर्णिकेन प्रकाशेन दीप्तः भवति। अस्य अयम् आशयःयद् अधुना तस्मिन् कक्षे यदि काऽपि सूचिरपि अथवा किमपि पत्रमपि निपतति तदा तत्पतनस्य ध्वनिः सर्वत्र प्रसारितः भविष्यति। एवंविधः एव अपरः रक्तः प्रकाशदीपः वार्त्ताप्रसारणकक्षतः बहिरपि भवति। वार्त्ताणां प्रसारणकाले सः दीपोऽपि प्रज्वलितः तिष्ठति येन वार्त्ताप्रसारणकाले कोऽपि जनः तत् कक्षे न प्रविशेत्।

**वार्त्ताप्रसारणकाले विशिष्टा सावधानता**

यदि वार्त्ताप्रसारणावधौ कापि विशिष्टा नूतनतमा वार्त्ता वार्त्ताकक्षतः प्रेष्यते (प्रायः क्रिकेटक्रीडास्पर्धानां नूतनतमो धावनाङ्कः) तर्हि प्रवाचकं निकषा तिष्ठता तत्सहयोगिना सा वार्त्ता संस्कृतभाषायाम् अनूद्य प्रवाचकाय प्रदीयते। प्रसारणसमाप्तिकालतः प्रायेण अष्टादशविकला (Seconds) पूर्वं प्रवाचकस्य सहयोगिना तस्मै प्रसारण–समाप्त्यर्थं संकेतः दीयते। तं संकेतं लब्ध्वा प्रवाचकः वार्त्ताप्रसारणस्य अवसानम् 'इति वार्त्ताः इति कथयित्वा उद्घोषयति।

## पाठगतप्रश्नाः 27.2

1. रिक्तस्थानानि पूरयत
   - (क) हिन्दीभाषायां यत् 'समाचार' उच्यते तत् हि संस्कृतभाषायां............ इति कथ्यत
   - (ख) आंग्लभाषायां यत् 'टॉक' कथ्यते तत्कृते संस्कृतभाषायां आकाशवाणीदूरदर्शनयोः. .......... इति पदं प्रयुज्यते।
   - (ग) आकाशवाणीभवने एकस्मिन् बृहदाकारके........... अनेके सम्पादकाः उपविशन्ति।
   - (घ) सम्पादकाः.................. लब्धाः सूचनाः सम्पादयन्ति।
   - (ङ) वार्त्ताप्रसारणात् प्रायेण दश–पंचदशकलापूर्वं.................... प्राप्यन्ते।

2. अधः प्रदत्तम×जूषातः उपयुक्तं पदं चित्वा वाक्यपूर्तिं कुरुत –
   (क) अनुवादे सरलं संस्कृतं................ ।
   (ख) वाक्यरचनासु समासबाहुल्यं................. ।
   (ग) अनुवादकार्ये अत्यधिकं अलंकृता पदावलिः.............. ।
   (घ) नूतनानां पदानां निर्माणं....................... ।

| मञ्जूषा |
|---|
| सर्वाधिकं कठिनम्, प्रयोज्यम्, परिहार्यम्, उपेक्षणीया। |

3. एकपदेन उत्तरं लिखत –

| प्रश्नाः | उत्तराणि |
|---|---|
| (क) वार्त्ताप्रसारणकक्षं कीदृशम्? | ........................... |
| (ख) प्रसारणकक्षे प्रवाचकः कुत्र उपविशति? | ........................... |
| (ग) तस्य सम्मुखं किं भवति ? | .......................... |
| (घ) तस्य सम्मुखं भित्तौ किं स्थाप्यते? | ........................... |
| (ङ) वार्त्ताप्रसारणस्य अवसानं किं कथयित्वा उद्घोष्यते? | ........................... |

## 27.5 दूरदर्शने वार्त्ता–निर्माण–प्रक्रिया

दूरदर्शने अपि प्रायः तेभ्यः एव स्रोतोभ्यः सूचनाः प्राप्यन्ते येभ्यः स्रोतोभ्यः आकाशवाण्यां सूचनाः लभ्यन्ते। दूरदर्शनस्य अनेके कार्यालयाः सन्ति। तेषु अन्यतमः नवदिल्लीस्थे 'खोलगांव' इति क्षेत्रे 'केन्द्रीय–कार्यक्रमनिर्माणकेन्द्रम्' (Central Productioin Centre) नाम्ना प्रसिद्धः। अत्र एकस्मिन् सुविशाले कक्षे 'वार्त्ताकक्षः' व्यवस्थापितः। तस्मिन् एव कक्षे वार्त्तानिर्देशकस्य एकम् आसन्दिकापटलं विद्यते तस्मात् निर्देशं लभमानाः अनेके सम्पादकाः हिन्दी–आंग्लभाषाभ्यां वार्त्तानिर्माणं कुर्वन्ति। एषु सम्पादकेषु एकः प्रमुखः वार्त्तासम्पादकः भवति। तस्मात् निर्देशं प्राप्य अन्यतमः सम्पादकः संस्कृतवार्त्ताभ्यः आंग्लभाषायां वार्त्ताः प्रयच्छति। आसां वार्त्तानां क्रमः तेन निश्चीयते। वार्त्तानां तत् पौर्वापर्यज्ञापकं तत्र 'रनडाउन' (Rundown) कथ्यते। संस्कृतज्ञेन सम्पादकानुवादकेन आंग्लभाषायां निर्मिताः वार्त्ताः अथ च 'रनडाउन' इत्यस्य प्रतयः प्राप्यन्ते। सः खलु वार्त्तानां संस्कृतानुवादं कुर्वाणः क्वचित् यथामति क्वचित् च यथानिर्देशं सम्पादनमपि करोति।



27.5

```
An error occurred while printing this page.
Error: typecheck            Offending Command: setcolor
Suggestions:
Restart your printer and send document again. Try proof
print or moving some of the non-printing elements off
the page.
```

टिप्पणी

•

# 28

# संस्कृतपत्रकारिता

भवन्तः षड्विंशे पाठे पठितवन्तः एव यत् 'संस्कृतपत्रकारिता' अपि प्रयोजन–मूलकसंस्कृतस्य एकं विशिष्टं क्षेत्रम् अस्ति। अद्यत्वे संस्कृतपत्रकारिता व्यावसायिकदृष्ट्याऽपि महत्त्वपूर्णा। अतः अस्याः स्वरूपमपि विस्तृतं जातम्। सञ्चारक्षेत्रे संस्कृतपत्रकारितायाः विशिष्टः उपयोगः क्रियते। संगणकमाध्यमेन पत्र–पत्रिकाणां कलात्मकरूपप्रदानेऽपि सारल्यं वैशिष्ट्यं च जातम्।

वस्तुतः नूतनं घटनावृत्तं (राजनैतिकं/सांस्कृतिकं/सामाजिकं/धार्मिकं), आलेखाः (प्राच्यज्ञान–विज्ञानमयाः), व्यक्तित्व–परिचयः, बालकथाः, नाटकम्, बुद्धिकौशलप्रश्नाः, योगः, स्वरचित–पद्यानि, व्यंग्य–हास्य–चित्रं लेखाः वा, खेलजगत्, विश्वबन्धुत्वं, विज्ञापनं, राष्ट्रीयता, समाचारवाचनम् (प्रसारणक्षेत्रे) एतत्सर्वं मिलित्वा एव संस्कृतपत्रकारितायाः स्वरूपम्। अतः संस्कृत–पत्रकारितायाः व्यवसायः भवतां कृते रुचिकरः लाभप्रदः च भवितुं शक्यते।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- संस्कृतपत्रकारितायाः स्वरूपं वर्णयिष्यति;
- संस्कृत–पत्रकारितायाः विविधानि क्षेत्राणि लेखिष्यति;
- आवधिक–संस्कृतपत्र–पत्रिकाणां सूचीं निर्मास्यति;
- विषयाणां संयोजनक्रमं लेखिष्यति;
- चित्राणां संयोजनस्य महत्त्वं लेखिष्याति;
- सर्वकारस्य कार्यालये पत्रस्य/पत्रिकायाः पंजीयनस्य अनिवार्यतां लेखिष्यति।



टिप्पणी



## क्रियाकलापः

भवान् समक्षं प्रदत्तवाक्यांशेन वाक्यपूर्तिं करोतु –

| | |
|---|---|
| (क) अद्यत्वे विविधानि..................................... । | (1) समाचारम् अपि शृणुमः। |
| (ख) संस्कृतेऽपि पत्र–पत्रिकाणां...................... । | (2) विज्ञापनानि भवन्ति। |
| (ग) आकाशवाणी–दूरदर्शनाभ्यां च वयं.......... । | (3) संस्कृतपत्रकारिताक्षेत्रे कार्यं कुर्वन्ति। |
| (घ) संस्कृत–पत्र–पत्रिकासु अपि..................... । | (4) समाचारपत्राणि प्रकाश्यन्ते। |
| (ङ.) अद्यत्वे अनेके युवकाः युवतयः च............ । | (5) प्रकाशनं भवति। |

## 28.0 अधुना अवगच्छामः

### संस्कृतपत्रकारिता

## 28.1 संस्कृतपत्रकारितायाः विविधानि क्षेत्राणि

आधुनिके युगे संस्कृतपत्रकारितायाः विविधानि क्षेत्राणि सन्ति।

भवन्तः स्वरुच्यनुसारं जीवने किमपि चेतुं शक्नुवन्ति। यथा हि –

(1) **आकाशवाणी–दूरदर्शनञ्च** प्रसारणदृष्ट्या आकाशवाणी–दूरदर्शन×च संस्कृतपत्रकारितायाः प्रमुखे क्षेत्रे स्तः। एतयोः विषये भवन्तः पूर्वपाठे विस्तरेण पठितवन्तः एव। संस्कृतसमाचारवाचनम् अपि विशिष्टं कौशलम्।

(2) **पत्र–पत्रिका प्रकाशनम्** क्षेत्रीय–राष्ट्रीय–अन्तर्राष्ट्रीयघटनानां संकलनं ततः व्यावहारिकसंस्कृतभाषया समाचारलेखनं पश्चात् प्रकाशनं क्रियते।

(3) **अनुवादः** – कस्यापि समाचारस्य / विवरणस्य, अन्यभाषायाः संस्कृतभाषायाम् अनुवादोऽपि संस्कृतपत्रकारितायाः कृते आवश्यकं वर्तते।

(4) **साहित्यपरिचयः** संस्कृतसाहित्यस्य अनेकाः विधाः सन्ति यथा महाकाव्य–दर्शन–कथा–नाट्य–प्रहेलिकादयः। सर्वासां विधानां वैज्ञानिकतत्त्वानां चानुशीलनम् अपेक्षितम्। तदैव संस्कृतपत्रकारिता विशिष्टताम् अर्हति।

(5) **पर्यटनम्** – पर्यटनमपि संस्कृतपत्रकारितायाः कृते आवश्यकम्। यतः देशे विदेशे वा ऐतिहासिक–धार्मिक–प्राकृतिक–स्थलानां परिचयः सम्यक्रूपेण पर्यटनेन एव शक्यते।

(6) **संगणक–ज्ञानम्** संगणके समाचाराणां, घटनानां विवरणम्, हास्य–व्यंग्य–चित्रनिर्माणम्, इत्यादीनां कथं कलात्मकशैल्यां टङ्कनं भवेत् इति ज्ञानमपि आवश्यकम्।

(7) **सम्पादनम्** पत्र–पत्रिकाणां सम्पादनं दुष्करं कार्यं भवति। तत्र विषयदृष्ट्या स्थानस्य उचितप्रयोगः, रिक्तस्थानस्य सदुपयोगः, समाचारविश्लेषणम्, सम्पादकीयलेखनम्, एतत्सर्वं सम्पादन– कौशलेन एव सम्भवम्।

(8) **संवाददाता** पत्रकारिता–व्यवसाये 'संवाददाता' एकःप्रमुखः घटकः भवति। संवाददाता एव यत्र तत्र सर्वत्र स्थितान् समाचारान् विविध–घटना–विवरणं पत्रिका–कार्यालये प्रेषयति। समाचाराणां प्रामाणिकता आवश्यकी भवति।

(9) **व्यंग्यचित्रम् (कार्टून)** व्यंग्यचित्रनिर्माणे व्यंग्यभाषाप्रयोगे च नैपुण्यम् अपेक्ष्यते यतः अस्य पाठकोपरि तीक्ष्णप्रभावः भवति।

मुद्रण–त्रुटिसंशोधनम् (प्रूफरीडिंग) – मुद्रितलेखानां त्रुटिसंशोधनं महत्वपूर्णं कार्यं भवति येन पत्रपत्रिकासु शुद्धमुद्रणं भवेत् अन्यथा पठने, बोधने च कष्टं भवेत्। विस्तरेण तु अन्तिमे पाठे पठितव्यम्।

**शोधक्षेत्रम्** अद्यत्वे अनुदिनं नूतनं नूतनं शोधकार्यं प्रचलति साहित्यम्, इतिहासं, प्राकृतिकरहस्यं, पर्यावरणम्, वैज्ञानिकं वा विषयमधिकृत्य। तेषाम् शोधकार्यस्य तथ्यात्मकं ज्ञानं प्रकाशनं सर्वथैव उचितम्। तत्तु बहुजनहिताय पत्रकारितया एव शक्यते।

**विज्ञापनम्** पत्रकारितायाः महत्त्वपूर्णक्षेत्रंविज्ञापनम् अपि अस्ति। व्यावसायिकदृष्ट्या वस्तूनां विविधसंस्थानाम्, प्रशिक्षणकौशलानां, सांस्कृतिकमूल्यानाम् जनहितोपयोगिकार्याणाम्, नानाविधानाम् उपलब्धीनां विज्ञापनस्य आवश्यकता भवति। तत्तु प्रसारणमाध्यमैः आकाशवाणी – दूरदर्शन–पत्र–पत्रिकाभिः एव सम्भाव्यते। एवमेव विविधसेवावृत्तिकृते जनानां हिताय रिक्तस्थानानां विज्ञापनमपि संस्कृतपत्रकारितायाः व्यावसायिकम् उद्देश्यम् अस्ति।

## पाठगतप्रश्नाः 28.1

1. संस्कृतपत्रकारितायाः प्रमुखतमं प्रसारणक्षेत्रम् अस्ति –

   (क) साहित्यम् (ख) सङ्गीतम्

   (ग) आकाशवाणी–दूरदर्शनञ्च (घ) संस्कृत–गोष्ठी

2. अत्र संस्कृतपत्रकारितायाः किम् क्षेत्रं नास्ति

   (क) सम्पादनम् (ख) पत्रिकाप्रकाशनम्

   (ग) व्यंग्यचित्रम् (घ) संस्कृत–पत्रिका–क्रयणम्।

3. प्राचीनं साहित्यं किं न अस्ति –

   (क) कथा–साहित्यम् (ख) पञ्चाङ्गम्

   (ग) नाट्यशास्त्रम् (घ) दर्शनम्

## 28.2 दैनिक–संस्कृत–समाचारपत्राणि

अस्माकं देशे प्रायः सर्वत्र विद्यालयेषु/महाविद्यालयेषु/विश्वविद्यालयेषु संस्कृतभाषायाः अध्ययनाध्यापनं प्रचलति, तथापि दैनिक–संस्कृत समाचार–पत्राणां नियमितं प्रकाशनं पर्याप्तं न भवति। पुनरपि सम्प्रति कानपुरतः 'नवप्रभातम् (दैनिकम्), 'सुधर्मा' (दैनिकम्), मैसूरतः च दैनिकसंस्कृतसमाचारपत्रे प्रकाश्येते। एतयोः प्रमुखसमाचाराः, घटनाः, सूचनाः, विज्ञापनं चित्रकथा, सुभाषितं च प्रकाश्यन्ते। भाषा अतीव सरला सुबोध्या भवति। येन सामान्यसंस्कृतशिक्षितजनाः अपि तत्संस्कृतसमाचारपत्रं सहजतया पठितुं शक्नुवन्ति।

## 28.3 विविधपत्र–पत्रिकाः

देशे विविध–संस्कृतपत्र–पत्रिकाणां प्रकाशनं समुचितरूपेण प्रचलति। एतासु पत्रिकासु न केवलं विशिष्ट–घटनानाम् उल्लेखः भवति, अपि तु प्राच्यज्ञान–विज्ञान लेखाः मनोरंजक–वार्ताः, व्यङ्ग्य– हास्यविनोदाः, चटुकुल्यानि, चित्रकथाः, बालकथाः सम–सामयिक–विचाराः इत्यादिकं सर्वं भवति। देशे तु शताधिक संस्कृत–पत्र–पत्रिकाणां प्रकाशनं जायते। परम् अत्र आवधिकक्रमेण कासाञ्चित पत्र–पत्रिकाणां नामानि प्रदीयन्ते। तदतिरिक्त–पत्र–पत्रिकाणां नाम–परिचयः संस्कृतसंस्थां/पुस्तकालयं गत्वा ज्ञातव्यः।

**साप्ताहिकपत्रम्**

**(1) गाण्डीवम्**
(सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वारणसी, उ.प्र.)

**पाक्षिकम्**

**(3) दिशा भारती**
43, उत्तरांचली एन्क्लेव,
कमालपुरम्, बुराड़ी, दिल्ली–110084

**(4) लोकसंस्कृतम्**
संस्कृतकार्यालयः
श्री अरविन्द आश्रम, पाण्डिचेरी–605002

**(5) दूर्वा (पाक्षिकपत्रम्)**
संस्कृतभवनम् बाणगंगा, भोपालनगरम् मध्यप्रदेशः 461002

**(6) वाक् (पाक्षिकं समाचारपत्रम्)**
11, नालापानी मार्गः, चुघवसतिः
देहरादूनम्, उत्तरांचलप्रदेशः 24001

**मासिकम्**

**(7) भारतधर्ममहामण्डलम्**
जगत्गंजम्, लहुरावीरः वाराणसी, उ. प्रदेशः

**(8) पारिजातम्**
105/94, प्रेमनगरम्
कर्णपुरम् (कानपुरम्), उ.प्र.

**पत्रिकाः**

**(1) भारतोदयः**
गुरुकुलमहाविद्यालयः
ज्वालापुरम्, हरिद्वारम्, उ.प्र. 249405

**(2) चन्दामामा 'मासिकी'**
डाल्टन एजेंसी, वाडापलानी
चेन्नई–60026 (तमिलनाडु)

**(3) आर्षज्योतिः**
श्रीमद्दयानन्दवेदविद्यालयः,
119 गौतमनगरम्, नव दिल्ली, 110049

**(4) ब्रजगन्धा (त्रैमासिकपत्रिका)**
रामाश्रय, कृष्णपुरी, मथुरा, उ.प्र. 281001

**(5) अर्वाचीनसंस्कृतम्**
देववाणीपरिषद्, आर.6, वाणी विहारः,नव दिल्ली, 110059

**(6) संस्कृतमञ्जरी**
दिल्लीसंस्कृत–अकादमी, दिल्ली सर्वकारः,
प्लाट सं.5, झण्डेवालनम्, करोलबाग, नव देहली–110005

**(7) भास्वती (षाण्मासिकपत्रिका)**
संस्कृतविभागः, काशीविद्यापीठम्, वाराणसी।

**(8) संस्कृतप्रतिभा (वार्षिकी)**
साहित्यवनम्, रवीन्द्रमार्ग, नव दिल्ली, 110001

**(9) शोधप्रभा (वार्षिकी)**
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विद्यापीठ, कटवारियासरायम्,
नव दिल्ली–110016

**अन्य विशिष्टाःपत्रिकाः**

**(10) संस्कृत विमर्शः**
राष्ट्रीय संस्कृत संस्थानम्
56–57 इन्स्टीट्यूशनल एरिया, पंखा रोड़, जनकपुरी, नव दिल्ली–110058

**(11) सम्भाषण सन्देशः**
'अक्षरम्' 8तमः क्रोस–, फेज–2, गिरिनगरम्, बंगलौर, 560085

**(11) 'शिक्षा सुधा'** (त्रैमासिकी) शिखासुधासंपादन समिति, पुरी, उड़ीसा

## 28.4 पत्रिकासु विषयाः

भवन्तः पूर्वमेव पठिवन्तः यत् पत्रिकाः विविधाः भवन्ति अवधिदृष्ट्या यथा दैनिकम् त्रैमासिकी वार्षिकी आदयः। विषयदृष्ट्याऽपि विविधाः भवन्ति यथा – संस्कृतप्रचारात्मिका, साहित्यविषययुक्ता, बालानां मोदिनी, शोधपत्रिका। परम् अधिकतमाः सामान्यपत्रिकाः भवन्ति यासु विविधविषयाः भवन्ति। यथा 1. आलेखाः, 2. सुभाषितम्, 3 पद्यानि, 4 कथाः, 5. वार्ताः, 6. संवादः 7. प्रहेलिकाः 8. हास्यम् (चुटुकुल्यः) 9. व्यङ्ग्यचित्रम् (कार्टूनम्) 10. विचारपरकलेखाः 11. शोधपरकलेखाः, 12. भारतीयसंस्कृतेः प्रेरणास्रोतांसि, 13. प्राच्यज्ञान–विज्ञानम्, 14. सम्पादकीयम्, 15. सांस्कृतिकसमाचाराः, 16. राष्ट्रीय–चिन्तनम्, 17. नाटकम्, 18. दर्शनम्, 19. समसामयिकविषयाः, 20. बालरचनाः, 21. व्याकरणानुशीलनम्, 22. पर्यावरणचिन्तनम्, 23 वैदिकं गणितम्, 24. आयुर्वेदः, 25. योगः, 26. विज्ञापनम्, 27. उद्घोषणा 28. सूचनाः 29. विषयसूची, 30. व्यक्तित्व–परिचयः।




काश्चन पत्रिकाः विशिष्टविषयाः भवन्ति। काश्चन शोधपत्रिकाः विदुषां कृते, शोधछात्राणां कृते उपयोगिन्यः। यथाहि सरस्वती सुषमा (वाराणसी), शोधप्रभा (श्री ला.ब.शा.रा.स. विद्यापीठम्, दिल्ली), संस्कृतविमर्शः (रा.सं. संस्थानम्) आदयः।

काश्चन पत्रिकाः किशोरणाम् कृते, स्नातकानां कृते उपयोगितमाः भवन्ति। यासु सांस्कृतिक–राजनैतिक–धार्मिक–स्वास्थ्य–योग–खेलजगत्,–मनोरंजन–कथा– नाट्यादीनां प्रस्तुतिः क्रियते। यथा 'संदेशः', (कानपुरम्) गाण्डीवम् (वाराणसी) सर्वगन्धा (लखनऊ), ब्रजगन्धा (मथुरा), रसिक–प्रिया, (चेन्नई) लोकसंस्कृतम् (पाण्डिचेरी) आदयः। संस्कृत–सम्भाषणाय तु 'संस्कृत–सम्भाषण–संदेशः' (बेंगलूरम्) पत्रिका उत्तमा।

## पाठगतप्रश्नाः 28.2

1. अत्र इदं दैनिकपत्रम् अस्ति इदं च साप्ताहिकम् –

| | |
|---|---|
| (क) लोकसंस्कृतम् | (ख) नवप्रभातम् |
| (ग) गाण्डीवम् | (घ) पारिजातम् |

2. इयं शोधपत्रिका अस्ति –
   (क) सम्भाषण संदेशः (बंगलौर) (ख) अर्वाचीनसंस्कृतम्
   (ग) शोधप्रभा (घ) सुरभारती
3. इयमेव पत्रिका त्रैमासिकी अस्ति –
   (क) दिशा भारती (ख) भारती
   (ग) हितसाधिका (घ) संस्कृतमञ्जरी
4. संस्कृत–सम्भाषण–शिक्षणार्थं पत्रिकाऽस्ति –
   (क) लोकसंस्कृतम् (ख) संदेशः (बेंगलूरम्)
   (ग) संस्कृतम् प्रचारकम् (घ) सूर्योदयः

## 28.5 विविध विषयाणां संयोजनम्

भवद्भिः पठितमेव यत् पत्र–पत्रिकासु विविधाः विषयाः भवन्ति अथवा विविधविषयकाः पत्रिकाः अपि भवन्ति। अतः प्रश्नोऽयं यत् पत्रेषु/पत्रिकासु विविधविषयाणां संयोजनं कथं करणीयम्? भवताम् उत्तरं तु निश्चितम् इदं भविष्यति यत्–प्राथमिकताधारेण एव विषयस्य संयोजनक्रमः भवेत्–। सत्यम् एवमेव। यथा अद्यत्वे समाचारस्य मुख्यविषयाः सन्ति 'बिहारे जलौघ विभीषिका', अपरः अस्ति पश्चिमबंगाले 'संगूर' विवादः ('नैनो' कृतेऽधिगृहीतभूमिसम्बन्धे) अन्योऽस्ति 'भारतस्य एटमी डील'–स्वीकृतिसम्बन्धे। ततः महाराष्ट्रे 'गणपति–महोत्सव' सम्बन्धे। अतः प्राथमिकताधारेण एव पत्र–पत्रिकासु उक्तविषयाणां संयोजनक्रमः दृश्यते। एवमेव व्यक्ति–वैशिष्ट्यम् अपेक्षते यथा महात्मागान्धिनः जन्मदिवसे तस्य विराटव्यक्तित्वस्य उल्लेखः एव प्राथमिकतायाः आधारः। अन्यः कोऽपि विशिष्टः समाचारः अपि प्रथमः भवितुं शक्यते। यथा – विश्व–ओलम्पिक क्रीडा चीनदेशे प्रारब्धा। तत्र चेत्–भारतीयः क्रीडकः स्वर्णपदकं लभेत तर्हि अयं समाचारः मुख्यः भवति। एवमेव यदि राज्ये/देशे राजनैतिक–सत्तापरिवर्तनं भवति, तदा एषः समाचारोऽपि विशिष्टः भवति।

अन्यच्च पत्र–पत्रिकासु यद्यपि खेलसमाचाराः अन्ते भवन्ति, परम् अन्ताराष्ट्रिय–क्रिकेटस्पर्धायां साफल्यमेव प्रमुखः समाचारः भवति। अतः अस्य प्राथम्यं भवति। ततः आलेखाः, सम्पादकीयम्, बालकथाः विज्ञानम् खेलजगत्– आदयो बहवः विषयाः भवन्ति।

## 28.6 चित्राणां संयोजनम्

भवन्तः पत्र–पत्रिकाः दृष्ट्वा स्वयमेव ज्ञास्यन्ति यत्–सम्पादकैः चित्राणां संयोजनस्य उचितः निर्वाहः कृतः न वा इति। वस्तुतः चित्राणामपि प्रासङ्गिकता भवति। प्रसङ्गानुसारमेव सुन्दरचित्रस्य व्यवस्था भवति।

## 28.7 पंजीयनम्

एवमेव प्रत्येकं राज्ये पत्र–पत्रिकाणां पंजीयनम् अनिवार्यं परमावश्यकम् च अस्ति। पत्रिकायां कीदृशाः विषयाः भविष्यन्ति, इत्यपि तत्र पंजीयनकार्यालये लिखित्वा पूर्वमेव देयम्। अतः पत्र–पत्रिकाणां प्रकाशनाय राजकीयविशिष्टाः नियमाः सन्ति। तेषाम् अनुपालनम् प्रकाशकैः/सम्पादकैः सर्वथा कर्तव्यम्।

## पाठगतप्रश्नाः 28.3

1. पत्र–पत्रिकासु विषयाणां संयोजनं क्रियते –
   (क) राजनैतिकविषयम् आधृत्य (ख) धार्मिकविषयम् आधृत्य
   (ग) प्राथमिकताधारेण (घ) बालकथाम् आधृत्य
2. चित्राणाम् संयोजनम् उचितं भवति यदि चित्राणाम् भवेत् –
   (क) प्रासङ्गिकता (ख) विविधवर्णता
   (ग) लघुरूपता (घ) बहुमूल्यता
3. पत्र–पत्रिकाणां प्रकाशनाय सर्वप्रथमम् आवश्यकम्–
   (क) समाचाराणां–एकत्रीकरणम् (ख) संवाददातासम्मेलनम्
   (ग) सर्वकारकार्यालये पंजीयनम् (घ) मुद्रितपत्रिकाणां संकलनम्

## 28.8 किम् अधिगतम्

- संस्कृत–पत्रकारितायाः स्वरूपम् विविध–ज्ञान–विज्ञान–मनोरञ्जनात्मकं भवति।
- प्रसारणम्, सम्पादनम्, मुद्रणम्, विज्ञापनम्, अनुवाद–शोधादयः संस्कृतपत्रकारितायाः क्षेत्रविशेषाः सन्ति।
- संस्कृतपत्रिकाः आपि आवधिकरूपेण प्रकाश्यन्ते।
- पत्र–पत्रिकासु विषयसंयोजनक्रमः, विषयस्य प्राथमिकताधारेण निश्चितः भवति।
- चित्राणां संयोजनाय प्रासङ्गिकता तार्किकता च अपेक्ष्यते।
- पत्र–पत्रिकाणां प्रकाशनाय सर्वकारकार्यालये पंजीयनम् अनिवार्यं भवति।

## 28.9 परियोजना कार्यम्

1. सम्प्रति शताधिक–संस्कृत–पत्र–पत्रिकाः देशे प्रकाशिताः भवन्ति। पाठे प्रदत्तपत्रातिरिक्त–पत्रिकाणां नामानि ज्ञात्वा सूची निर्मातव्या।
2. कमपि संस्कृत–पत्र–पत्रिका प्रकाशनकार्यलयं गत्वा तत्र प्रकाशनविधिः ज्ञायताम्

## 28.10 पाठान्तप्रश्नाः

1. संस्कृत–पत्रकारितायाः स्वरूपं वर्णयत।
2. संस्कृत पत्रकारितायाः विविधानि क्षेत्राणि कानि? स्पष्टयत।
3. आवधिकक्रमेण प×च पत्र–पत्रिकाणाम् नामानि लिखत।
4. पत्रिकासु विषयाणां संयोजनक्रमः कथं क्रियते? स्पष्टयत।
5. चित्राणां पत्रिकासु संयोजनस्य महत्त्वं स्पष्टयत।
6. संस्कृत पत्र–पत्रिकाणां पंजीयनं अनिवार्यम् इति विषये स्पष्टयत।
7. संस्कृतपत्रकारिता अपि एकः उत्तमः व्यवसाय इति विषये प×च वाक्यानि लिखत।

## 28.11 उत्तराणि

**पाठगतप्रश्नाः उत्तराणि**

**28.1**

1. (ग) 2. (घ) 3. (ख)

**28.2**

1. दैनिक पत्रम् (ख) साप्ताहिकं पत्रम् (ग)
2. (ग) 3. (घ) 4. (ख)

**28.3**

1. (ग) 2.(क) 3. (ग)

**पाठान्तप्रश्नाः**

एषाम् उत्तराणि स्वेच्छया लिखत।

# 29

# पत्रिकायाः प्रारूपम्

भवद्भिः पूर्वं पठितम् एव यत् संस्कृतभषायामपि अनेकाः पत्र–पत्रिकाः प्रकाश्यन्ते। तेषु कानिचित् दैनिकसमाचारपत्राणि सन्ति, कानि च साप्ताहिकानि। काश्चन पत्रिकाः पाक्षिकाः मासिकाः, द्वैमासिकाः, त्रैमासिकाः अपि सन्ति। अतः संस्कृतस्य पत्रकारिताक्षेत्रम् अतिविशालम्। दुर्लभाः एव संस्कृतभाषायां कार्यकर्तारः। अतः संस्कृतपत्रकारिताम् अधिकृत्य यदि अपेक्षितम् आधारभूतं ज्ञानं प्राप्यते तर्हि जीवने व्यवसायस्य अनेके स्वर्णावसराः उपलब्धाः भविष्यन्ति। अस्मिन् पाठे तदेव आधारभूतं ज्ञानं, लेखानां कथानां संकलनं, सम्पादनम्, व्यक्तिवस्तूनां परिचयः, विज्ञापनानां, व्यंग्यचित्राणां सूक्तीनाम् च उपयोगिता अत्र विस्तरेण वर्णिता।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्


- पत्रिकायाः मूलभूतसिद्धान्तानां महत्त्वं वर्णयिष्यति;
- पत्रिकायाः कृते अपेक्षितसामग्रीणां चयनं करिष्यति;
- विज्ञापनानाम् आवश्यकतां वैशिष्ट्यं च वर्णयिष्यति;
- व्यक्तीनां वस्तूनां च परिचयं लेखिष्यति;
- व्यंग्यचित्राणां भूमिकां विशदीकरिष्यति;
- लेखैः सह समुचितसूक्तीनां संयोजनं करिष्यति;
- वार्ताः अधिकृत्य आकर्षकाणि शीर्षकाणि लेखिष्यति।

## क्रियाकलापः


चित्रैः सह मञ्जूषाप्रदत्तशीर्षकाणि मेलयत



(क) ____________________



(ख) ____________________



(ग) ____________________



(घ) ____________________



(ङ) ____________________

| |
|---|
| (1) गणतन्त्रदिवसः, (2) विश्वजनसंख्यादिवसः, (3) नौसेना प्रवेशः, (4) वृक्षारोपणम् प्रदूषणनिवारकम् (5) अहर्निशं सेवामहे। |

## प्रक्रियाप्रारूपम्

सुस्पष्टमेव यत् पत्रिकायाः पत्रस्य वा आकर्षणं चित्रैरेव वर्धते। चित्राणि यदि समुचित–शीर्षकैः युक्तानि भवन्ति तर्हि तानि झटिति पाठकस्य मनः आकर्षन्ति। अवधारणानां सम्यग् बोधः भवति। अस्मिन् पाठे पत्रिकायै किं किम् अपेक्षितम् इति अत्र पठामः। तदनन्तरम् भवान् अपि स्वपत्रिकां प्रकाशयितुं नूनं समर्थः भविष्यति।

### (1) सम्पादकमण्डलस्य निर्माणम्

पत्रिकायाः कृते अनेकाः व्यवस्थाः अपेक्षिताः। अनेकानि कार्याणि भवन्ति। नीति–निर्धारणम् उद्देश्यनिर्धारणम् अपि कारणीयं भवति। अतः एकः प्रमुखः सम्पादकः भवति। केचन विषयपरामर्शकाः भवन्ति। कश्चन प्रबंधकः धनव्यवस्थादिकं कार्यं करोति। अतः सर्वप्रथमं सम्पादकमण्डलस्य निर्माणं करणीयम्।

### (2) पत्रिकायाः नामाङ्कनम्

पत्रिकायाः नाम्नः पुलिस–आयुक्तस्य आलेखे पंजीकरणम् आवश्यकम्। यदि नाम्नः पंजीकरणं न भविष्यति तर्हि कि भविष्यति? एकस्य एव नाम्नः विविधाः पत्रिकाः भविष्यन्ति। वैधानिकरूपेण दण्डनीयः च अपराधः भवति।

### (3) पत्रिकायाः अवधिनिर्धारणम्

दिनपत्रिका अस्ति वा मासिकी, द्वैमासिकी, त्रैमासिकी वा, तदर्थं पूर्वमेव निश्चयः करणीयः। सुनिश्चितं करोतु भवतः पत्रिकायाः अवधिः कः?

### (4) पत्रिकायाः आकारनिर्धारणम्

पत्रिकायाः आकारः कीदृशः भविष्यति? दैनिक समाचारपत्रस्य आकारः भिन्नः भवति, साप्ताहिक–पत्रिकायाः आकारः भिन्नः भवति, द्वैमासिक–त्रैमासिकपत्रिकायाः आकारेषु अपि वैभिन्न्यं वर्तते। परन्तु एकस्याः पत्रिकायाः आकारः प्रायः सुनिश्चितः एव भवति येन तस्याः अभिज्ञानं सारल्येन भवेत्।

**गतिविधिः**

विभिन्नपत्रपत्रिकाणाम् नामानि तासाम् आकारं च मापयित्वा लिखत।

### (5) पत्रिकायाः उद्देश्यनिर्धारणम्, पाठकवर्ग–निर्धारण×च

क. प्रत्येकं पत्रिकायाः यत् उद्देश्यम् भवति, तदनुरूपमेव पाठ्यसामग्रीणां संकलनं भवति। स्वास्थ्यरक्षाविषयकपत्रिकायां प्रायः स्वास्थ्यविषयकाः एव लेखाः, कथाः

इत्यादयः भवन्ति। किशोराणां कृते प्रकाशितायां पत्रिकायां किशोराणां समस्याः एव प्रमुखाः भविष्यन्ति।

ख. कासाञ्चित् पत्रिकाणां प्रति–अङ्कम् अपि निर्धारितं लक्ष्यं भवति यथा दीपावलि विशेषाङ्कः, ग्राहकाधिकारविशेषाङ्कः, महिला–विशेषाङ्कः, तीर्थविशेषाङ्कः इत्यादयः। विश्वदिवसानाम् अपि तत्र संयोजनम् भवेत् यथा विश्वसाक्षरतादिवसः विश्वएड्सदिवसः। आलेखार्थं पत्रिकायाः वर्षसंख्या, अङ्कसंख्या अपि लिख्यते येन क्रमानुसारं काश्चन प्रतयः आलेखार्थं सुरक्षिताः क्रियन्ते।

**(6)** पत्रिकायाः कृते लेखचयनार्थम् कः पाठकवर्गः इत्यपि चिन्तनीयः। भाषास्तरः अपि तथैव निर्धारितः भवति। यदि पत्रिका बालकानां कृते वर्तते तर्हि अधिकचित्रमयी सरला भाषा प्रयुज्यते।

**(7)** किशोराणां पत्रिकायां सामग्री चिन्तनप्रेरिका भवेत्। मुखपृष्ठम् अपि आकर्षकं लक्ष्याधारितं च भवेत्। एकस्याः पत्रिकायाः मुखपृष्ठे एकस्य नृपस्य चित्रम् आसीत्। सः भूमौ उपविष्टः। पृष्ठस्य उपरि लिखितम् आसीत् ग्राहकः सिंहासनरहितः नृपः। एवमेव प्रति–अङ्कं मुखपृष्ठं तस्य केन्द्रबिन्दुम् अधिकृत्य आकर्षकं भवेत्।

**(8)** व्ययानुसारं कर्गदपत्रस्य चयनं, मुद्रणे वर्णानां प्रयोगः क्रियते। यदि केवलं श्याममसीप्रयोगः भवति तर्हि व्ययः अल्पः भवति, यदि चतुर्णां वर्णानां प्रयोगः भवति, तर्हिं व्ययः अधिकः भवति।

## पाठगतप्रश्ना 29.1

(1) अधोलिखितकथानानां समक्षं शुद्धम् (√) अथवा अशुद्धं वा (×) इति चिह्नेन विशदयत।

| यथा | (√) शु. | अ. (×) |
|---|---|---|
| (i) पत्रिकाः मासिकाः एव भवन्ति। | ––– | ––– |
| (ii) बालकानां पत्रिकायै भाषा अतीव सरला चित्रैः अलंकृता भवेत् | ––– | ––– |
| (iii) व्ययानुरूपं मुद्रणव्यवस्था भवेत्। | ––– | ––– |
| (iv) पत्रिकायाः उद्देश्यं मनोरंजनम् एव भवति। | ––– | ––– |
| (v) पत्रिकायाः मुखपृष्ठं केवलं चित्ताकर्षकं भवेत्। | ––– | ––– |
| (vi) पत्रिकायाः आकारे वैविध्यं भवेत्। | ––– | ––– |
| (vii) कस्याश्चित् पत्रिकायाः आकारः प्रति–अंकम् विविधः भवति। | ––– | ––– |
| (viii) पत्रिकायाः भाषा साहित्यिकम् न भवेत्। | ––– | ––– |
| (ix) पत्रिकायाः नामाङ्कनं पुलिस–आयुक्तस्य कार्यालये कारणीयम्। | | |

## द्वितीयः अंशः

## 29.2 अपेक्षितसामग्रीणां चयनम्

(1) **वैविध्यम्** पत्रिकायाः सामग्र्यां वैविध्यम् अपेक्षते। मनोरंजकाः लेखाः, कथाः, चटुकुल्याः व्यंग्यचित्राणि, भविष्यफलम् विज्ञापनानि, इत्यादीनि पाठकवर्गस्य अनुसारं भवेयुः।

(2) **यात्रावर्णनानि** कस्यचित् पर्वतीयप्रदेशस्य अथवा तीर्थस्थानस्य, अथवा द्वीपसमूहस्य भौगोलिकम् ऐतिहासिकं, प्राकृतिकं महत्त्वं सचित्रं यदि प्रकाश्यते तर्हि तेन पत्रिकायाः महत्त्वं वर्धते।

(3) **महापुरुषाणां जीवनपरिचयः** अस्माकं देशे बहव–महापुरुषाः अभवन् यान् वयम् तेषाम् आध्यात्मिक–उपलब्धीनां कृते पूजयामः। तेषां जीवन–चरित्रमपि यदि प्रकाश्यते तर्हि जनसाधारणस्य मार्गदर्शनं भवति। छात्राणां मनसि स्वदेशं प्रति स्वसंस्कृतिं प्रति च आस्था जागृता भवति।

(4) **संस्थानां परिचयः** पत्रिकायाः यत् उद्देश्यं भवति तेन सम्बद्धानां संस्थानां परिचयः यदि प्रकाश्यते तर्हि पाठकानाम् ज्ञानवर्धनम् भवति। यथा किशोराणां कृते कुत्र कुत्र व्यवसायक्षेत्राणि सन्ति। विशेषमहोत्सवाः, स्वास्थ्यविषयकयोजना, एड्स आदि संक्रामकरोगेभ्यः सुरक्षा इति विषयाः अपेक्षिताः स्युः।

(5) **सम्बद्धप्रशासनिकनियमानां ज्ञानम्**–पाठकवर्गस्य हिताय ये प्रशासनिकनियमाः भवन्ति, अथवा नवीन पुस्तकानां विमोचनम्, अथवा नवीनपाठ्यक्रमाणाम् अध्ययन–अध्यापनसुविधाः अधिकृत्य अपि सामग्र्याः प्रकाशनेन पत्रिकायाः महत्त्वं वर्धते।

(6) **मनोर×जकः सामग्री** पत्रिकायाः पठनेन पाठकस्य मनोर×जनं भवेत् तदर्थं पाठकवर्गानुसारं चटुकुल्यानां लघुहास्यनाटिकादीनां, कवितानां संकलनम् अपि पूर्वमेव करणीयं येन यथासमयम् तेषाम् उपयोगः भवेत्।

(7) **स्वास्थ्यविषयकाः** अपि लेखाः भवेयुः। कस्मिन् ऋतौ किं किं भक्षणीयम् किं न भक्षणीयम्, कस्मिन् रोगे कथम् आहारः स्वीकरणीयः इत्यादयः।

(8) **समये प्रकाशनं वितरणं च** पत्रिका यथा–अवधि समये प्रकाशिता भवेत्। तस्याः वितरणमपि (डाक द्वारा) अथवा व्यवस्थायाः अनुसारं समयेन एव भवेत्। मध्ये यदि अधिकः अन्तरालः भवति तर्हि पाठकवर्गेण सह सम्बन्धे शैथिल्यं प्रजायते रुचिः अपि च समाप्तप्राया भवति।

(9) **धनव्यवस्था**–पत्रिकायाः मुद्रणाय धनव्यवस्था अपि पूर्वमेव करणीया। ये लेखनादि–सामग्रीं प्रदास्यन्ति तेषां कृते अपि धनं दातव्यम् भवति। पत्रिकायाः मूल्यं तदनुसारम् एव निर्धारणीयम्। आकारसहितं पृष्ठसंख्या स्तम्भवर्गीकरणम् अपि पूर्वमेव चिन्तनीयम्।

(10) **पाठकानां पत्राणि तेषाम् उत्तराणि च** एषा प्रतिक्रिया पत्रिकायाः उत्तरोत्तरं संशोधने संवर्धने व सहायिका भवति।

## पाठगतप्रश्नाः 29.2

उपर्युक्तबिन्दुषु अधः केचन बिन्दवः न समायोजिताः तान् परिज्ञाय लिखत–

(1) वैविध्यम्

(2) प्रशासनिक नियमाः

(3) धनव्यवस्थाः

(4) संस्थापरिचयः

(5) मनोरञ्जकसामग्री

(6) यथासमयं प्रकाशनं वितरणं च।

(7) ......................................

(8) ......................................

(9) ......................................

---

## तृतीयः अंशः

## 29.3 विज्ञापनानाम् आवश्यकता महत्त्वं च

(1) भवन्तः जानन्ति एव पत्र–पत्रिकाणां कृते धनस्य आवश्यकता भवति। विज्ञापनैः पत्रिकायाः–कृते आर्थिकी सहायता प्राप्यते। अतः विज्ञापनानां महत्त्वम् अत्यधिकं भवति। इदमपि ध्यातव्यं यत् विज्ञापनेषु अश्लीलता, देशद्रोहिता, धर्मान्धता आदयः च न प्रदर्शिताः भवेयुः।

(2) **विज्ञापनानां वैविध्यम्**

- वस्तूनां विक्रयार्थं विज्ञापनानि
- नियुक्तिकृते विज्ञापनानि
- विद्यालयेषु शैक्षिकसंस्थासु प्रवेशार्थं विज्ञापनम्
- विविधकार्यक्रमाणां सूचनार्थम्
- मृतपुरुषान् प्रति श्रद्धा×जलिः
- विवाहार्थम् उचितवरवधूचयनार्थम्
- रिक्तभवनानाम् अल्पकालिकभाटकार्थम्
- अन्यानि बहूनि अपि।

**गतिविधिः**

समाचारपत्रात् विज्ञापनानां वैविध्यम् अधिकृत्य एकैकम् उदाहरणम् प्रतिविषयं चयनीयम्।

**विज्ञापनानि**



विशिष्ट रेखाचित्र–निर्मात्री संस्थायाः विज्ञापनम्

पश्यत अस्मिन् विज्ञापने किं वैशिष्ट्यम् ? ननु कर्णयोः अतिविशालता। ध्वनिमुद्रिकाणां निर्मात्री संस्था संदिशति–ध्वनिमुद्रिकां श्रोतुं कर्णौ अतिविस्तीर्णौ कुरुत।

## चतुर्थः अंशः

## 29.4 व्यक्तीनां वस्तूनां परिचयः

कस्यापि व्यक्तेः वस्तुनः वा परिचयलेखनात् पूर्वं रूपरेखायाः निर्माणं करणीयम्। वर्णनं मनोरंजकं भवेत् अतः तस्य प्रारम्भः केनापि प्रसंगेण भवेत् यथा शंकराचार्यस्य परिचये तस्य बाल्यकाले मकरेण तस्य पादः नद्यां गृहीतः, संन्यासकृते मातुः अनुमतेः अनन्तरमेव मुक्तिः जाता इति प्रसंगं पूर्वं लिखित्वा तदनु जन्मविषये, भ्रमणविषये, शास्त्रार्थविषये, वेदान्तप्रचारविषये लेखनेन वर्णने मनोरंजकता भवति।

**परिचयः** नातिलघुः, न चातिदीर्घः भवेत्। प्रायः पत्रिकासु एकस्य लेखस्य आकारः द्वित्रिपृष्ठात्मकः एव भवेत्। भाषा सरला भवेत्। मध्ये मध्ये संवादानाम् योजनेन अपि मनोरंजकता वर्धते। वाक्यानि नातिदीर्घानि भवेयुः। यथास्थिति चित्राणामपि संयोजनं भवेत्।

## 29.5 व्यङ्ग्यचित्राणां भूमिका

पत्रपत्रिकासु व्यंग्यचित्राणां योजनेन पत्रिकायाः मनोरंजकता मस्तिष्क–उद्बोधनक्षमता, विषये ध्यानस्य केन्द्रीकरणं च जायते। यस्य विषये व्यंग्यचित्रं प्रकाश्यते तत् तथ्यं अधिकं ध्यानम् आकर्षति। तेषां वैशिष्ट्यं भवति कथनस्य संक्षिप्ता, सारगर्भिता च। व्यंग्यचित्रकाराः प्रायः दुर्लभाः, अतीवसशक्तव्यंग्यचित्राणि तु दुर्लभानि भवन्ति।

अधोलिखितानि व्यंग्यचित्राणि दृष्ट्वा तेषाम् अभिप्रायं ज्ञातुं प्रयत्नं कुरुत

1. संगीतकारः महाभारतयुद्धं प्रविशति।



2. अर्थात् संगीतकारः महाभारतयुद्धस्य वर्णनं स्वगीतानां माध्यमेन करिष्यति।



ग्राहकस्य अधिकारहन्तारः

ग्राहकाणाम् अवस्थां शोचनीया भवति यदा ते वस्तुविक्रेतुः समीपे वस्तुदोषनिवारणार्थं गच्छन्ति। व्यंग्यचित्रं ग्राहकस्य शोचनीयाम् अवस्थां प्रकटयति।

## 29.6 सूक्तीनां संयोजनम्

महापुरुषैः प्रकटितानि सुभाषितानि अथवा काव्येषु महाकाव्येषु प्रयुक्ताः सूक्तयः लेखानां समापने अथवा यत्र–तत्र उपलब्धस्थानस्य ज्ञानवर्धकाय उपयोगाय सूक्तीनां प्रयोगः क्रियते। पत्रिकाप्रकाशने पृष्ठस्य पृष्ठांशस्य रिक्तता तु अपराधवत् गण्यते। अतः पत्रिकाभिः सम्बद्धैः जनैः विविधविषयसूक्तीनां संग्रहः अवश्यमेव करणीयः येन आवश्यकतानुसारं तासां प्रयोगं सरलतया कर्तुं शक्येत।

सूक्तीनां संकलनं विविधविषयानुसारमेव करणीयम् यथा स्वास्थ्यविषयकसूक्तयः–

(क) विना श्रमं भोजनस्वीकारः पापाय।

(ख) शरीरमाद्यं खलु धर्मसाधनम्।

(ग) हितभुक् मितभुक् ऋतुभुक् भव।

(घ) स्वास्थ्यं रत्नाद् अपि मूल्यवत्।

## 29.7 आकर्षकशीर्षकाणि

लेखानां प्रकाशितसामग्र्याः वार्तादीनां च शीर्षकाणां महत्त्वं तु अवर्णनीयमेव। आकर्षक–शीर्षकाणि पाठकस्य मनः झटिति एव आकृष्य तं लेखं/वार्तां/कथां वा पठितुं बाध्यं कुर्वन्ति।

### शीर्षकाणां वैशिष्ट्यम्

1. शीर्षकं सरलं सुबोध्यं च भवेत्।
2. शीर्षकं प्रायः शिक्षाप्रदं भवेत्।
3. शीर्षक सम्बद्धलेखस्य केन्द्रीयभावेन सम्बद्धं भवेत्।
4. शीर्षकं प्रायः लेखात् एव उद्धृतप्रायं भवेत्।
5. कानिचित् आकर्षकशीर्षकाणि
   1. अक्षयो भारतद्रुमः।
   2. सर्वेभ्यः दानेभ्यः अभयदानं विशिष्यते।
   3. धर्मार्थकामाः सममेव सेव्याः।
   4. भवतां प्रश्नाः अस्माकम् उत्तराणि।
   5. 'मोबाइल' दूरभाषयन्त्रस्य दुष्प्रभावः।

| गतिविधिः |
|---|
| समाचारपत्रेभ्यः पत्रिकाभ्यश्च कानिचित् दश शीर्षकाणि चित्वा लिखत। |

## 29.8 किम् अधिगतम्

- पत्रिकाप्रकाशनम् अतीव महत्त्वपूर्णं कार्यम् अस्ति। अनेन जनकल्याणं भवति, संस्कृतस्य सेवा, प्रचारः प्रसारःच भवति।
- व्यवसायस्य कृते अनेके अवसराः लभ्यन्ते।

- पत्रिकायाः कृते अपेक्षितबिन्दूनां ज्ञानम् आवश्यकम् यथा यन्त्रीकरणम्, सामग्रीसंकलनम्, पत्रिकायाः आकारः, विशेष–अंकानां प्रकाशनम् धनव्यवस्था, मुद्रणव्यवस्था, त्रुटिसंशोधनम्, लेखानां संपादनम् इत्यादयः।
- विज्ञापनैः आर्थिकव्यवस्थायां सहायता प्राप्यते।
- व्यक्तीनां, वस्तूनां परिचयलेखनं मनोर×जकं ज्ञानवर्धकं च भवेत्।
- व्यंग्यचित्राणाम् आवश्यकता भवति।
- विभिन्नविषयकसूक्तीनां संग्रहःकरणीयः येन यत्र तत्र यदि पंक्तिद्वयस्य स्थानं भवति तत्र सूक्तीणां प्रयोगः कर्तुं शक्यते।
- शीर्षकाणि आकर्षकाणि एव भवेयुः।

## 29.9 पाठान्तप्रश्नाः

1. संस्कृते एकस्याः मासिकपत्रिकायाः नाम लिखत।
2. निम्नलिखितपट्टिकां दृष्ट्वा वदत – (क) "एषा पत्रिका कतिभ्यः वर्षेभ्यः प्रकाश्यते?

   (ख) किम् एषा पत्रिका मासिकी, द्वैमासिकी, त्रैमासिकी वा?

   (ग) कस्य मासस्य पत्रिका एषा?

   पट्टिका | वर्षम् 25 अंकः 10, आषाढ़ श्रावणविक्रमसंवत् 2065 जुलाई 2008 |
3. अधोलिखतं चित्रं पश्यत

क                                        ख



साभारम्–सम्भाषणसन्देशः

क. कस्य नु खलु एतत् विज्ञापनम्?

ख. 'क' 'ख' चित्रयोः मध्ये कः भेदः?

ग. अति स्थूलाक्षरैः लिखितानि वाक्यानि पुनः लिखत।

4. अधोलिखितम् अनुच्छेदम् अधिकृत्य शीर्षकं लिखत

(क) गोविन्दराजस्वामिनः वार्ताः श्रुत्वा श्रीनिवासः अवदत्–भ्रातः तव हस्ते धनस्य रेखाः सन्ति। अतः तव समीपे कदापि धनस्य अभावः न भविष्यति। इदानीं त्वं श्रान्तः असि। पर्वतस्य समीपे गत्वा तत्रैव विश्रामं कुरु। श्रीनिवासस्य कथनानुसारं गोविन्दराजस्वामी पर्वतस्य अधः शिलारूपेण विराजमानः अभवत्। अस्य नगरस्य नाम गोविन्दराज–स्वामिनगरम् एव विख्यातम् अभवत्। कालक्रमेण तदैव नगरं तिरुपति (श्रीपतिः) इति नाम्ना प्रसिद्धिं गतम्।

(ख) एकदा भृगुः विष्णोः धैर्यस्य परीक्षणार्थं वैकुण्ठम् अगच्छत्। सः अतीव क्रुद्धः इव विष्णोः वक्षसि पादेन प्रहारम् अकरोत्। विष्णुः स्वशय्यातः उत्थाय भृगोः चरणम् अधारयत् अपृच्छत् च – "भगवन्! मम शरीरम् तु अतीव कठोरम्। भवतां पादारविन्दम् तु अतीव कोमलम्।" इति उक्त्वा भृगोः चरणं धृत्वा स्वहस्ताभ्याम् सेवां प्रारब्धवान्। भृगुः महर्षिः, लज्जितः भूत्वा विष्णोः पादयोः अपतत् अवदत् च – "भगवन्! कृपया क्षमस्व। भगवन् एव नूनं धैर्यवान् सर्वदेवेषु श्रेष्ठः इति।'

## 29.10 उत्तराणि

**क्रियाकलापः**

(क) अहर्निशं सेवामहे

(ख) विश्वजनसंख्यादिवसः

(ग) नौसेनाप्रवेशः

(घ) वृक्षारोपणं प्रदूषणनिराकरणम्

(ङ) गणतन्त्रदिवसः

**पाठगतप्रश्नाः**

**29.1** (i) (×) (ii) (√) (iii) (√) (iv) (×) (v) (×) (vi) (×) (vii) (×) (viii) (√) (ix) (√)

**29.2** (i) यात्रावर्णनानि (ii) संतानां जीवनपरिचयः

(iii) स्वास्थ्यविषयकाः लेखाः (iv) पाठकप्रतिक्रिया





**29.3** समाचारपत्रात् विज्ञापनानां चयनं कृत्वा विषयेषु विभाजनं करणीयम्।

**29.4** समाचारपत्रेभ्यः दशशीर्षकाणि चित्वा लेखनीयानि।

**29.9 पाठान्तप्रश्नाः**

**1.** स्वयं लिखत

**2** (क) 25 वर्षेभ्यः (ख) मासिकी (ग) जुलाईमासस्य

**3.** (क) पुस्तकत्रयस्य विज्ञापनम्

(ख) त्रीणि पुस्तकानि ग्रन्थरूपे, 'ख' चित्रे पुस्तकं सान्द्रमुद्रिका रूपेण (CD)

(ग) शीर्षकम् – 'सद्यः लोकाय अर्पितानि'

प्रथमचित्रे

(क) साइंस इन संस्कृत

(ख) भगतसिंहः

(ग) व्यूहभेदः अन्याः कथाश्च

द्वितीयचित्रे बालरञ्जिनी

**4.** क. प्रथमः अनुच्छेदः शीर्षकाणि– तिरुपतिनाम्नः रहस्यम्

ख. द्वितीयः अनुच्छेदः धैर्यपरीक्षा, कः सर्वेदेवेषु श्रेष्ठः

# 30

# मुद्रणत्रुटिशोधनम्

भवतः समक्षं पुस्तकाकारे सम्यक् व्यवस्थिता ज्ञानविज्ञानपूरिता पाठ्यसामग्री विराजते। किं जानाति भवान् यत् एतस्य पुस्तकस्य वर्तमानरूपसम्पादनात् पूर्वं किं किं कृतम्? नूनं पाठ्यक्रमनिर्माणं, पाठानां लेखनं, तेषां क्रमानुसारम् आयोजनं, ततः सम्पादनं मुद्रणसमये त्रुटीनां संशोधनं, पुनः मुद्रणे त्रुटीनां निराकरणं, चित्रसंयोजनम् इत्यादयः। त्रुटिसंशोधननार्थं कानिचित् सुनिश्चित्चिह्नानि एव प्रयोज्यन्ते।

अस्मिन् पाठे वयं एतत् अधिकृत्य एव किञ्चित् ज्ञानं प्राप्नुमः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- मुद्रणत्रुटिशोधनस्य स्वरूपं स्पष्टं करिष्यति;
- मुद्रणत्रुटिशोधनस्य महत्तां प्रतिपादयिष्यति;
- मुद्रणत्रुटिशोधकस्य विशेषताः वर्णयिष्यति;
- मुद्रणसाधनानां विवरणं लेखिष्यति;
- विविधानाम् आकाराणाम् (Fonts) विवरणं लेखितुं प्रभविष्यति;
- मुद्रणत्रुटिशोधनस्य नियमान् उल्लेखिष्यति;
- मुद्रणत्रुटिशोधनस्य सङ्केतचिह्नानां विरामचिह्नानां च शुद्धं प्रयोगं करिष्यति।

## क्रियाकलापः

अधोलिखिते गद्यांशे रेखाङ्कितेषु शब्देषु वर्तनीगताः अशुद्धयः वर्तन्ते। भवान् पठित्वा एतान् शब्दान् शुद्धरूपेण पुनः लिखतु

कस्यचित् अपि देशस्य साहित्ये तस्य चिन्तनं सुरक्षितं तिष्ठति। कालीदासस्य काव्येषु तथा नाटकेषु भारतस्य सांस्कृतिकदृष्टिः यत्र तत्र परिलक्ष्यते। रघुवंशे राज्ञः दिलीपस्य गोसेवा तथा च गोरक्षायै प्राणोत्सर्गस्य भावना इति उभयं गोरक्षायाः एकं विशिष्टम् उदाहरणम् अस्ति। अभिज्ञानशकुन्तले कण्वस्य आश्रमे प्रविष्टस्य राज्ञः मृगवधात् अवरोधनम् – "राजन! आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः" इति अहिंसाभावनायाः उत्कृष्टं निदर्शनं संदृश्यते। शकुन्तलायाः पतिग्रहगमनसमये आश्रमस्य पादपलताः प्रति संवेदना प्राकृतिकपरिवेशम् उद्दिश्य जागरुकतायाः उत्कृष्टम् उदाहरणं वर्तते।

शुद्धशब्दाः

1...........................

2...........................

3...........................

4...........................

5...........................

## 30.1 अधुना अवगच्छामः

### मुद्रणत्रुटिशोधनम्

पाठस्य प्रारम्भे प्रश्नः कृतः यत् एतस्य पुस्तकस्य वर्तमानरूपसम्पादनात् पूर्वं किं किं कृतम्। सम्प्रति वयम् अस्य विवेचनं कुर्मः। सर्वप्रथमं विद्वद्भिः लिखिताः विविधाः पाठाः सङ्कलिताः। तदनन्तरं विशेषज्ञैः परिमार्जिताः चित्रकारेण सम्बद्धैः चित्रैः सुसज्जिताः एते पाठाः प्रकाशिताः। प्रकाशनप्रक्रियायां मुद्रणकाले मुद्रण–त्रुटिशोधनस्य कार्यं सावधानतया सम्पादितम्। यदि एतत् कार्यं सम्यक्तया सम्पाद्यते तर्हि रचना अशुद्धिविरहिता भवति। अन्यथा उत्कृष्टा अपि रचना त्रुटिपूर्णा जायते। एवमेव प्रत्येकं समाचारपत्रं, सर्वाः पत्रिकाः सर्वाणि पुस्तकानि च महत्याः प्रक्रियायाः अनन्तरम् एव प्रकाश्यन्ते। प्रकाशनप्रक्रियायां मुद्रणत्रुटिशोधनम् एकम् अत्यधिकं दुष्करं महत्त्वपूर्णं कर्म।

टिप्पणी

## 30.2 मुद्रणत्रुटिशोधनस्य स्वरूपं महत्त्वं च

कस्याः अपि सामग्र्याः अन्तिमरूपेण मुद्रणात् प्राक् अशुद्धिसंशोधनार्थं निश्चितैः सङ्केतचिह्नैः चिह्नीकरणमेव मुद्रणत्रुटिशोधनं कथ्यते। कदाचित् मुद्रणस्थाने (press) केषाञ्चित् शब्दानां अशुद्धरूपे मुद्रणं भवति। कदाचित् समरूपशब्दान् पठित्वा भ्रमवशात् पाण्डुलिप्याः काश्चित् पंक्तयः अमुद्रिताः एव तिष्ठन्ति। कदाचित् च अन्या काचित् त्रुटिः भवति। एतासाम् अशुद्धीनां निराकरणाय चिह्नीकरणम् अथवा प्रकाशनप्रक्रियायां मुद्रितसामग्र्याः मूलरूपानुरूपकरणमेव त्रुटिशोधनम्। अन्तिमरूपेण मुद्रणानन्तरं काऽपि अशुद्धिः अवशिष्टा न भवेत् इत्येव अस्य कार्यस्य प्रमुखं प्रयोजनम्। 'प्रूफ' इति नाम्ना प्रथितां मुद्रितसामग्रीं मुद्रणत्रुटिशोधकः अनेकशः पठति। सर्वप्रथमं यदा शब्दव्यवस्थापकेन (Compositor) प्रथमवारं पाण्डुलिपितः शब्दाः व्यवस्थाप्यन्ते तर्हि सा मुद्रितसामग्री "गैली–प्रूफ" इति उच्यते। "गैली–प्रूफ" इत्येतस्मात् अशुद्धीनां निराकरणानन्तरं शब्दव्यवस्थापकः सामग्र्यानुरूपं पृष्ठाकारानुरूपं च परिष्कारं विधाय पुनः मुद्रणं करोति। एषा मुद्रितसामग्री 'मेक–अपप्रूफ' इति नाम्ना ज्ञायते। त्रुटिशोधकेन 'मेक–अपप्रूफतः' अशुद्धीनां निरस्तीकरणानन्तरं तस्याः पुनः मुद्रणं क्रियते। एषा मुद्रितसामग्री 'अन्तिमप्रूफ' इति उच्यते। एषा सामग्री अपि त्रुटिशोधकेन पुनः पठ्यते। अन्ततः मुद्रणयन्त्रेण मुद्रणं क्रियते। 'अन्तिमप्रूफ' इत्यस्मिन् अपि यदि काचित् अशुद्धिः अवशिष्यते तर्हियन्त्रारूढपृष्ठेषु तां निराकृत्य एव मुद्रणं क्रियते।

मुद्रणत्रुटिशोधनम् अत्यधिकं महत्त्वपूर्णं कार्यम्। यदि लेखकस्य त्रुटिशोधकस्य वा अज्ञानतया असावधानतया क्षिप्रकारितया वा मुद्रितसामग्र्यां काश्चित् त्रुटयः अवशिष्टाः तर्हि उत्कृष्टा अपि रचना त्रुटिपूर्णा जायते। एतादृशी रचना विद्वत्समाजे न आद्रियते। त्रुटिरहितमुद्रणार्थं त्रुटिशोधनस्य कार्यं सर्वाधिकं महत्त्वपूर्णम् परन्तु एतत् सुकरं न वर्तते। सम्यक् त्रुटिशोधनं त्रुटि–शोधकस्य योग्यतायाम् अनुभवे च आश्रितम्। एतस्मिन् कार्ये अनवरताभ्यासेन एव नैपुण्यम् प्राप्यते।

### मुद्रणत्रुटिशोधकस्य विशेषताः

- मुद्रणत्रुटि–संशोधकस्य कृते प्रूफसंशोधनस्य मानकचिह्नानां पूर्णज्ञानं तेषां प्रयोगे दक्षता च अनिवार्यं।
- अशुद्धिनिराकरणे त्रुटिशोधकस्य दृष्टिः गृध–दृष्टिवत् भवेत् यतः काऽपि अशुद्धिः नावशिष्येत। प्रत्येकं वाक्यं, वाक्यांशः, शब्दः अक्षरं च अतिसूक्ष्मतया निरीक्ष्य शुद्धीकरणीयानि।
- त्रुटिशोधकस्य कृते मुद्रणकलायाः शब्दव्यवस्थायाः (composing) तकनीकस्य (technique) यथेष्टं ज्ञानम् अपेक्ष्यते। तेन मुद्रणे प्रयुज्यमानैः सर्वविधैः आकारैः आयामैश्च परिचितेन भवितव्यम्।
- त्रुटिशोधकस्य कृते उत्कृष्टं सामान्यज्ञानम् अत्यधिकम् आवश्यकम्।

- त्रुटिशोधकस्य विशालः शब्दभाण्डागारः अत्यधिकं सहायकः भवति। अनेन सः लेखकस्य असावधानतया अज्ञानतया वा कृतं शाब्दिकं प्रमादमपि आत्मविश्वासेन दूरीकर्तुं समर्थः भवति।
- वर्तन्याः अशुद्धीनां निरस्तीकरणाय त्रुटिशोधकेन कोशसाहाय्यग्रहणे कदापि आलस्यं न करणीयम्।
- त्रुटिशोधकेन अस्पष्टलेखनस्य पठने दक्षेण भवितव्यम्।
- त्रुटिशोधकस्य साहित्ये महती अभिरुचिः, इतिहास–पुराण–अर्थशास्त्र–राजनीति–कला–विज्ञानादि विषयाणां प्रगाढज्ञानं च अत्यधिकं सहायके भवतः।
- यदि कश्चित् त्रुटिशोधकः समाचारपत्रेषु त्रुटिशोधनस्य कार्यं करोति तर्हि तस्य कृते समसामयिक–घटनानां ज्ञानमपि अपरिहार्यम्।
- मुद्रितसामग्रीं तीव्रगत्या सम्यक् अधीत्य अशुद्धीः अवचित्य तासां संशोधनस्य सामर्थ्यम् एव त्रुटिशोधकस्य सर्वोत्कृष्टं वैशिष्ट्यम्।
- त्रुटिशोधकेन शब्दविभाजनप्रक्रियया सम्यक्तया परिचितेन भाव्यम्। उदाहरणतया यदि पंक्त्याः अन्ते 'गौरवशाली' इति पूर्णः शब्दः मुद्रयितुं न शक्यते तर्हि 'गौरव' 'शाली' च इति द्वयोः भागयोः विभज्य–इति चिह्नेन पृथक्कृत्य 'गौरव' इति शब्दः पंक्त्याः अन्ते, 'शाली इति शब्दश्च द्वितीयपंक्त्याः प्रारम्भे लेखनीयः।

**उदाहरणम्** भारतं महान् देशः। अस्य उदात्ता संस्कृतिः गौरव–
शालिनी विज्ञानपरम्परा च सर्वत्र आद्रियेते।

## Q पाठगतप्रश्नाः 30.1

1. उपयुक्तैः शब्दैः रिक्तस्थानानि पूरयत
   (क) अन्तिमरूपेण मुद्रणात् प्राक् ———————— निश्चितैः ——————— चिह्नीकरणमेव मुद्रणत्रुटिशोधनम्।
   (ख) मुद्रणानन्तरं काऽपि ———————— अवशिष्टा न भवेत् इत्येव अस्य कार्यस्य प्रमुखं———————।
   (ग) शब्दव्यवस्थापकेन यदा प्रथमवारं ——————— शब्दाः व्यवस्थाप्यन्ते तर्हि सा मुद्रितसामग्री——————— इति उच्यते।
   (घ) यदा अशुद्धीनां निराकरणानन्तरं शब्दव्यवस्थापकः —————— पृष्ठाकारानुरूपं च ———————— विधाय पुनः मुद्रणं करोति तदा एषा मुद्रितसामग्री ——————— इति उच्यते।
2. मुद्रणत्रुटिशोधकस्य पञ्चविशेषताः संक्षेपेण लिखत। यथा – मुद्रणत्रुटिशोधनचिह्नानां प्रयोगे दक्षता।
   (क).................................
   (ख).................................





(ग)...................................

(घ)...................................

(ङ)...................................

## 30.2 मुद्रणसाधनानि

भवन्तः सर्वे जानन्ति यत् प्राचीनकाले मुद्रणसुविधा न आसीत्। ग्रंथाः पुस्तकानि च पाण्डुलिप्यामेव भवन्ति स्म। शतद्वयं वर्षपूर्वम् एव मुद्रणं सम्भवं जातम्। प्रारम्भे एतत् अतीव कष्टसाध्यं दुष्करं च आसीत्। शब्दव्यवस्थापकः पाण्डुलिप्याः व्यवस्थापनं करोति स्म। सः काष्ठखण्डेषु (stick) पृष्ठस्य आकारानुरूपं रचनायाः स्वरूपानुरूपं च अक्षराणां व्यवस्थापनं कृत्वा व्यवस्थापितां सामग्रीं 'गैली' इत्यस्मिन् लौहपात्रसदृशे उपकरणे स्थापयति स्म। पृथक्–पृथक् कार्याणां कृते पृथक्–पृथक् 'गैलीनां' प्रयोगः क्रियते स्म। शब्दव्यवस्थापकः 'गैलीं' परितः सूत्रेण बद्ध्वा प्रूफवाहकाय ददाति स्म। सः 'रोलर' इत्यनेन मसीप्रयोगं कृत्वा सामग्रीं 'प्रूफप्रेस' इत्यस्मिन् स्थापयति स्म। एवं कस्याश्चित् सामग्र्याः मुद्रणं भवति स्म।

साम्प्रतं तु सङ्गणक–युगं (Computer Age) वर्तते। प्रत्येकं क्षेत्रे सङ्गणकेन कार्यं क्रियते। प्रकाशनक्षेत्रे अपि सङ्गणकस्य अप्रतिमं महत्त्वम्। सङ्गणकयन्त्रं मानवस्य निर्देशानुसारं कार्यं करोति। 'डिस्क ऑपरेटिव सिस्टम' इत्यनेन यंत्रांशेन प्रयोक्तुः सङ्गणकस्य च मध्ये सरलतया सम्बन्धः स्थाप्यते। सङ्गणकेन अविलम्बेन निर्देशानुरूपं सर्वम् अभीष्टं कर्म सम्पद्यते। उदाहरणार्थं यदि कञ्चित् मुद्रितम् अंशं निरस्तीकृत्य कुत्रचित् अन्यत्र संयोजनम् इष्यते तर्हि तत् सङ्गणकेन तत्क्षणमेव निष्पद्यते। प्रकाशनक्षेत्रे डीटीपी 'डेस्कटॉप पब्लिशिंग' इति सॉफ्टवेयर–कार्यक्रमः (program) सर्वविधं भवतः साहाय्यं कर्तुं सन्नद्धः। अस्मिन् पृष्ठानां यथेष्टं विशिष्टं रूपनिर्माणं कर्तुं शक्यते। महत्त्वपूर्णानां तथ्यानां मञ्जूषायां स्थापनं, तालिकानिर्माणं, सूचनानां विविधप्रकारेण उल्लेखनं सर्वम् अनायासं कुड्मप–(button) संपीडनमात्रेण (press) सम्भवम्। मुद्रणसामग्र्याः विविधेषु आकारेषु (fonts) विविधेषु आयामेषु, विविधासु च शैलीषु प्रसाधनं सम्भवम्। भवताम् एतत् पुस्तकमपि 'डीटीपी' इत्यस्य 'पेजमेकर सॉफ्टवेयर' इत्यनेन सज्जीकृतम्। अत्र विशेषतया अवलोकनीयं यत् सङ्गणकस्य उपयोगेन त्रुटिशोधनस्य शब्दव्यवस्थापनस्य च कार्ये सुकरे जाते। सम्प्रति एकस्याः अशुद्ध्याः संशोधनार्थं सम्पूर्णायाः पंक्त्याः पुनर्व्यवस्थापनं न करणीयम्। इदानीं सामग्र्यां शब्दस्य वाक्यांशस्य वा योजनार्थं सम्पूर्णस्य अनुच्छेदस्य पुनः संयोजनं न कर्तव्यम्।

## पाठगतप्रश्नाः 30.2

1. उपयुक्तेन शब्देन रिक्तस्थानं पूरयत –

(क) प्रारम्भे मुद्रणम् अतीव...................... आसीत्।

(ख) सङ्गणकयन्त्रं मानवस्य..................... कार्यं करोति।

(ग) प्रकाशनक्षेत्रे ..................... सॉफ्टवेयरकार्यक्रमः साहाय्यं करोति।

(घ) सङ्गणकस्य उपयोगेन त्रुटिशोधनं..................... जातम्।

(ङ) सम्प्रति शब्दस्य वाक्यांशस्य वा योजनार्थं सम्पूर्णस्य अनुच्छेदस्य ..................... न कर्त्तव्यम्।

## 30.3 त्रुटिशोधनस्य प्रमुखाः नियमाः

- त्रुटिशोधकेन मुद्रितसामग्र्याम् अशुद्धिस्थाने केवलं निरस्तीकरणचिह्नं (/) प्रयोज्यम्।
- प्रत्येकं पंक्तिं भागद्वये विभज्य प्रथमार्द्धपंक्त्याः अशुद्धीनां संशोधनं वामोपान्ते शेषार्द्धपंक्त्याः च अशुद्धीनां संशोधनं दक्षिणोपान्ते सङ्केतचिह्नाङ्कनेन करणीयम्। यदि अन्यस्मिन् स्थाने संशोधनं क्रियते तर्हि तत् (संशोधनं) शब्दव्यवस्थापकेन प्रायः उपेक्ष्यते। परिणामतः अशुद्धिः यथावत् तिष्ठति। यदि कदाचित् उपान्तयोः स्थानाभावः वर्तते अशुद्धीनां च संख्या अधिका विद्यते तर्हि मुद्रितपृष्ठस्य उपरि अधः वा सम्बद्धस्थानात् रेखया प्रदर्श्य संशोधनं कर्तव्यम्।
- सदैव स्पष्टानां सुपाठ्यानाम् एव संकेतचिह्नानां प्रयोगः करणीयः अन्यथा शब्दव्यवस्थापकेन नूतनानाम् अशुद्धीनां सम्भावना जायते।
- सदैव पाण्डुलिपि–अनुरूपमेव संशोधनं करणीयम्। पाण्डुलिप्यां परिवर्तनं कदापि न करणीयम्। यदि कुत्रचित् काचित् अशुद्धिः प्रतीयते तर्हि प्रश्नवाचकचिह्नाङ्कनानन्तरं मुद्रितप्रतिः लेखकस्य समीपं प्रेषणीया।
- केषाञ्चित् शब्दानाम् एकाधिकाः वर्तन्यः प्रचलिताः भवन्ति। एतादृश्यां परिस्थित्यां लेखकेन स्वीकृता वर्तनी एव स्वीकरणीया। स्वेच्छानुसारं परिवर्तनं परिहार्यम्।
- अन्तिमरूपेण मुद्रणाय त्रुटिशोधकेन पृष्ठसंख्या, शीर्षकम् अध्यायानां शीर्षकानि, आरेखाः, चित्रादीनि च सावधानतया निरीक्षणीयानि। यदि काचित् त्रुटिः दृश्यते तर्हि अन्तिमरूपेण मुद्रणात् पूर्वमेव संशोधनं कारयेत्। पूर्णरूपेण संतुष्ट्यनन्तरमेव मुद्रणादेशः प्रदेयः। तत्र दिनाङ्कसहितं स्वहस्ताक्षराणि अवश्यमेव करणीयानि।

## 30.4 त्रुटिशोधनस्य चिह्नानि

मुद्रितप्रत्याम् (Proof) अशुद्धीः चिह्नीकर्तुं येषां सङ्केतानां प्रयोगः क्रियते तानि एव मुद्रणशोधनस्य चिह्नानि कथ्यन्ते। त्रुटिशोधनार्थं कानिचित् निर्धारितानि चिह्नानि सन्ति येषां प्रयोगेन शब्दव्यवस्थापकः त्रुटिशोधकस्य तात्पर्यम् अवगत्य अशुद्धीः दूरीकरोति। स्थूलरूपेण एतानि चिह्नानि द्विधा विभज्यन्ते–

(क) सामान्य–चिह्नानि

(ख) विरामचिह्नानि



टिप्पणी



## (क) सामान्य–चिह्नानि

| | अ□ुद्धरूपम् | भाुद्धरूपम् |
|---|---|---|
| (i) *L* | भा*L*रतं वि ालं राश्ट्म् | भारतं वि ालं राश्ट्म् |
| (ii) De | भासनसस्य निर्वहणे क्ले ाःसन्ति | भासनस्य निर्वहणे क्ले ाःसन्ति |
| (iii) # | यथाराजा तथा प्रजा | यथा राजा तथा प्रजा |
| (iv) ⁀ ‿ | भारतस्य कीर्तिः अ द्य | भारतस्य कीर्तिः अद्य वि वे प्रसृता। |
| (v) (It) | भगवद्गीता कि×pn+ v/hrk | Hkxon~xhrk foxpn/hrk |
| (vi) Bold | **lR;eso** t;rs | **lR;eso** t;rsA |
| (vii) *Ls* ↑ | lR;aon | lR;aon |
| (viii) *Ls* ↓ | lR;aon | lR;aon |
| (ix) □ | /ucyeso ekua ;ksX;rk;k% | /ucyHksn ;ksX;rk;k%ekue~ |
| (x) *L* | fo\|kfookn; /ua enk;*L* ाक्ति_ | विद्याविवादाय धनं मदाय भाक्ति........ |
| (xi) // | तेशा विशये न जानीमः। स्वार्थ<br>सम्पादं प्राणिनां सहजः<br>स्वभावः। सर्वं स्वार्थ समीहतं<br>रतिमाघः वदति | तेशां विशये न जानीयः।<br>स्वार्थसम्पादनं प्राणिनां सहजः स्वभावः।<br>सर्वः स्वार्थ समीहते इति माधः वदति |
| (xii) L,<br>L;L, | उपकारः सात्तादेव भवेत् Lन<br>परम्परायै भीघ्रमेव भवेत् L<br>न कालक्रमेण हन्ति | उपकारः सात्तादेव भवेत्,<br>न परम्परायै; भीघ्रमेव<br>भवेत्, न कालक्रमेण इति। |
| (xiii) ← | यः सर्वेशां हिताय सः सर्वार्थः<br>←सर्वार्थे अपि स्वार्थः अस्ति। | यः सर्वेशां हिताय सः सर्वार्थः<br>सर्वार्थे अपि स्वार्थः भवति। |
| (xiv) Set Margen | यः सर्वेशा हिताय सः सर्वार्थः<br>सर्वार्थे अपि स्वार्थः अस्ति। | यः सर्वेशा हिताय सः सर्वार्थः<br>सर्वार्थे अपि स्वार्थः अस्ति। |
| (xv) ⁘ Para Missing | विदे ेशु भारतीयानांप्रगतिः<br>(यथावत्) हर्शप्रकर्शं जनयति। | विदे ेशु भारतीयानां<br>प्रगतिः हर्शप्रकर्शं जनयति। |

## पाठगतप्रश्नाः 30.3

1. अधोलिखितानां चिह्नानां व्याख्यां कुरुत –

| चिह्नम् | व्याख्या |
|---|---|
| (क) D/L | ------------------ |
| (ख) # | ------------------ |
| (ग) 〰 | ------------------ |
| (घ) ⁐ | ------------------ |
| (ङ) N/L | ------------------ |

2. निम्नलिखिते गद्यांशे त्रुटिशोधनं कुरुत।

   विश्व–सा हित्ये न तादृशः कोऽपि ककविः विद्यते येन स्वकाव्ये प्रकृतेः चित्रणं न कृतम्। कश्चित् तस्याः हास्यमयं रूपम् अथवा शोकाकुलं रूपम् पश्यत्। अन्यः वा तस्याः संगीतम् अश्रृणोत् अपरश्च तस्याः गर्जनं तर्जनं वा। कश्चित तस्याः मुग्धरूपं दृष्टवान् हृदयकम्पोत्पादकं भयावहं रूपम् अवलोकितवान्। अन्यैः च तस्याः उभयविधं स्वरूपं साक्षात्कृतम्।

3. चिह्नानाम् अधोलिखितां व्याख्यां पठित्वा चिह्ननिर्माणं कुरुत – यथा – तिर्यक्अक्षरेषु परिवर्तनीयम् –

| व्याख्या | चिह्नम् |
|---|---|
| (क) यथानिर्दिष्टं योजनीयम्। | ------------------ |
| (ख) समानम् अन्तरं करणीयम्। | ------------------ |
| (ग) बृहद्–अक्षरेषु करणीयम्। | ------------------ |
| (घ) आकारः वर्धनीयः। | ------------------ |
| (ङ) नवीनः अनुच्छेदः। | ------------------ |
| (च) मध्ये योजनीयम्। | ------------------ |

## (ख) विरामचिह्नानि

मुद्रणत्रुटिशोधनस्य कार्यार्थं विरामचिह्नानां सम्यक् ज्ञानम् अनिवार्यम्। लेखनकार्ये शब्दानां वाक्यानाम् उपवाक्यानां च परस्परं सम्बन्धद्योतनार्थं, विषयविशेषस्य विभिन्नेषु भागेषु विभजनार्थं, पठने विरामार्थं च येषां चिह्नानां प्रयोगः क्रियते तानि विरामचिह्नानि कथ्यन्ते। स्थूलरूपेण 'विराम' इत्यस्य अर्थः विरमणम्। परन्तु यत्र–तत्र विरामचिह्नानां प्रयोगः अर्थस्य स्पष्टतायै च अथवा भावस्य सुबोधतायै अपि क्रियते। उपयुक्तस्य विरामचिह्नस्य अभावे अर्थः अस्पष्टः जायते अथवा अन्यथा गृह्यते। अतः त्रुटिशोधकेन विरामचिह्नानाम् अशुद्धिः सावधानतया दूरीकरणीया।

संस्कृतभाषायां निम्नलिखितानि विरामचिह्नानि प्रमुखतया प्रयुज्यन्ते –

| चिह्नस्यनाम | चिह्नम् | उदाहरणम् |
|---|---|---|
| पूर्णविरामः | । | अस्माकं प्राचीनविज्ञानपरम्परा समृद्धा अस्ति। |
| अल्पविरामः | , | योगशास्त्रे तत्रः बन्धाः ख्याताः मूलबन्धः, उड्डियानबन्धः, जालन्धरबन्धश्चेति। |
| अर्द्धविरामः | ; | राधा, सीता, सरला च गताः; मोहनः, सोमनाथः, रामश्च तत्र एव स्थिताः; परन्तु सभाध्यक्षाः न आगताः। |
| प्रश्नवाचकचिह्नम् | ? | किं तत् असम्भवम्? |
| विस्मयादिबोधकचिह्नम् | ! | अहो! कुलाचारे कीदृशी श्रद्धा! |
| निर्देशचिह्नम् | – | व्याकरणम् – तत् शास्त्रं यस्मिन् शब्दानां शुद्धरूपं प्रयोगश्च निरूप्यते। |
| कोष्ठकचिह्नम् | ( ) | व्यवहारार्थं कालगणना द्विधा कृता (क) नित्यः (सैद्धान्तिकः वा)(ख) अनित्यः (गणनात्मकः वा) |
| उद्धरणचिह्नम् | " " | न्यायमूर्तिः रङ्गनाथमिश्रः अकथयत् – "वयं सर्वे संस्कृतभाषाद्वारा देशस्य धार्मिकीं सांस्कृतिकीम् आध्यात्मिकीं च उन्नतिं साधयाम।" |
| विवरणचिह्नम् (आंग्लभाषायाम् एतत् 'कोलन' कथ्यते। विवरणचिह्नं विसर्गश्च सदृशौ वर्तेते परन्तु लेखने अन्तरः भवति। 'विसर्गः' सदैव पूर्वाक्षरेण सह समीपमेव लिख्यते विवरणचिह्नं किञ्चित् स्थानानन्तरम् एव लिख्यते।) | : | भाषाविज्ञानस्य पञ्चांगानि भवन्तिः ध्वनि–विज्ञानम्, रूप–विज्ञानम्, शब्द–विज्ञानम्, वाक्य–विज्ञानम्, अर्थविज्ञानम् च। |
| योजकचिह्नम् | — | माता–पितरौ, दिने–दिने, शान्ति–निकेतनम् |
| संक्षेपचिह्नम् | ० | श्री भा. भू. अग्रवालः (भारतभूषण अग्रवाल) पं. (पण्डित) मदनमोहनमालवीयः। |

## पाठगतप्रश्नाः 30.4

निम्नलिखितेषु वाक्येषु विरामचिह्नानां प्रयोगं कुरुत

(1) ईश्वरेच्छां विना किमपि न भवति

(2) भवत्याः नाम किम्

(3) ईश्वरः अजरः अमरः शुद्धः व्यापकः सर्वज्ञश्च वर्तते

(4) मनुना समुपदिष्टम् आत्मनः प्रतिकूलानि परेषां न समाचरेत्

(5) अधिष्ठानभेदेन रोगाः द्विधाः भवन्ति शारीरिकरोगाः मानसिकरोगाश्च

An error occurred while printing this page.
Error: **rangecheck** Offending Command: **image**
Suggestions:
Value in PostScript file is out of range. Restart your printer and send document again. Try proof print or moving some elements off the page.